भगवन्योगसंसिद्धिकाङ्क्षिणो वयमागताः ॥ ४ ॥
सा च योगं विना यस्मान्न भवेत्तमतो वद ।
ऋषिभिर्योगमिच्छद्भिः स तैरेवमुदाहृतः ॥ ५ ॥
प्रत्युवाच प्रहृष्टात्मा नमस्कृत्य महेश्वरम् ।
शृणुध्वं संप्रवक्ष्यामि सर्वसिद्धिफलप्रदम् ॥ ६ ॥
मालिनीविजयं तन्त्रं परमेशमुखोद्गतम् ।
भुक्तिमुक्तिप्रदातारमुमेशममरार्चितम् ॥ ७ ॥

स्वस्थानस्थमुमा देवी प्रणिपत्येदमब्रवीत् ।
सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम्[1] ॥ ८ ॥
यत्त्वया कथितं पूर्वं भेदत्रयविसर्पितम् ।
मालिनीविजये तन्त्रे कोटित्रितयलक्षिते ॥ ९ ॥
योगमार्गस्त्वया प्रोक्तः सुविस्तीर्णो महेश्वर ।
भूयस्तस्योपसंहारः प्रोक्तो द्वादशभिस्तथा[2] ॥ १० ॥
सहस्रैः सोऽपि विस्तीर्णो गृह्यते नाल्पबुद्धिभिः ।
अतस्तमुपसंहृत्य समासादल्पधीहितम् ॥ ११ ॥
सर्वसिद्धिकरं ब्रूहि प्रसादात्परमेश्वर ।
एवमुक्तस्तदा[3] देव्या प्रहस्योवाच विश्वराट् ॥ १२ ॥
शृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम् ।
यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम् ॥ १३ ॥
मयाप्येतत्पुरा प्राप्तमघोरात्परमात्मनः ।
उपादेयं च हेयं च विज्ञेयं परमार्थतः ॥ १४ ॥
शिवः शक्तिः सविद्येशा मन्त्रा मन्त्रेश्वराणवः ।
उपादेयमिति प्रोक्तमेतत्षट्कं फलार्थिनाम् ॥ १५ ॥
मलः कर्म च माया च मायीयमखिलं जगत् ।
सर्वं हेयमिति प्रोक्तं विज्ञेयं वस्तु निश्चितम् ॥ १६ ॥

१ तं० शतकोटिप्रविस्तरमिति पाठः । २ तं० द्वादशभिस्त्वत इति पाठः ।
३ तं० उक्तस्तत इति पाठः ।

एतज्ज्ञात्वा परित्यज्य सर्वसिद्धिफलं लभेत् ।
तत्रेशः सर्वकृच्छान्तः सर्वज्ञः सर्वकृत्प्रभुः ॥ १७ ॥

सकलो निष्कलोऽनन्तः शक्तिरप्यस्य तद्विधा ।
स सिसृक्षुर्जगत्सृष्टेरादावेव निजेच्छया ॥ १८ ॥

विज्ञानकेवलानष्टौ बोधयामास पुद्गलान् ।
अघोरः परमो घोरो घोररूपस्तदाननः ॥ १९ ॥

भीमश्च भीषणश्चैव वमनः पिबनस्तथा ।
एतानष्टौ स्थितिध्वंसरक्षानुग्रहकारिणः ॥ २० ॥

मन्त्रमन्त्रेश्वरेशत्वे[1] संनियोज्य ततः पुनः ।
मन्त्राणामसृजत्तद्वत्सप्त कोटीः समण्डलाः ॥ २१ ॥

सर्वेऽप्येते महात्मानो मन्त्राः सर्वफलप्रदाः ।
आत्मा चतुर्विधो ज्ञेयस्तत्र विज्ञानकेवलः ॥ २२ ॥

मलैकयुक्तस्तत्कर्मयुक्तः प्रलयकेवलः ।
मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम् ॥ २३ ॥

धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणम् ।
ईश्वरेच्छावशादस्य[2] भोगेच्छा संप्रजायते ॥ २४ ॥

भोगसाधनसंसिद्ध्यै भोगेच्छोरस्य मन्त्रराट् ।
जगदुत्पादयामास मायामाविश्य शक्तिभिः ॥ २५ ॥

---

१ प० त्री० मन्त्रमहेश्वरेशत्वे इति पाठः । २ क० पु० वशात्तस्येति पाठः ।

सा चैका व्यापिनीरूपा निष्कला[1] जगतो निधिः ।
अनाद्यन्ताशिवेशानी व्ययहीना च कथ्यते ॥ २६ ॥
असूत सा कलातत्त्वं यद्योगादभवत्पुमान् ।
जातकर्तृत्वसामर्थ्यो विद्यारागौ ततोऽसृजत् ॥ २७ ॥
विद्या विवेचयत्यस्य कर्म तत्कार्यकारणे ।
रागो[2]ऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि ॥ २८ ॥
नियतिर्योजयत्येनं स्वके कर्मणि पुद्गलम् ।
कालोऽपि कलयत्येनं तुट्यादिभिरवस्थितः ॥ २९ ॥
तत एव कलातत्त्वा[3]दव्यक्तमसृजत्ततः ।
गुणानष्टगुणां तेभ्यो धियं धीतोऽप्यहं[4]कृतम् ॥ ३० ॥
तत्त्रिधा तैजसात्तस्मात्मनोऽक्षेशमजायत ।
वैकारिकात्ततोऽक्षाणि तन्मात्राणि तृतीयकात् ॥ ३१ ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं बुद्धीन्द्रियाणि तु ।
कर्मेन्द्रियाणि वाक्पाणिपायूपस्थाङ्घ्रयः क्रमात् ॥ ३२ ॥
कलादिक्षितिपर्यन्तमेतत्संसारमण्डलम् ।
समुद्रा[5]दि जगत्कृत्स्नं परिवर्तयतीच्छया ॥ ३३ ॥

---

१ क० पु० निष्कलस्य स्वभावजेति । ख० पु० निष्कलस्य शिवात्मन इति पाठः । "निष्कला" इत्यारभ्य 'कथ्यते' इत्यन्तःपाठः घसंज्ञपुस्तकात्पूरितः ।
२ क० मु० रागोऽनुरञ्जयतीति पाठः । ३ क० ख० तत्त्वमव्यक्तमिति पाठः ।
४ क० ख० ग० पु० अहंकृतिमिति पाठः । ५ ख० ग० पु० समुद्राद्यमिति पाठः ।

भेदः परः कलादीनां भुवनत्वेन यः स्थितः ।
असृजत्तमसावेव भोगिनां भोगसिद्धये ॥ ३४ ॥
इत्यनेन कलाद्येन धरान्तेन समास्थिताः ।
पुमांसः सकला ज्ञेयास्तदवस्थाजिघांसुभिः ॥ ३५ ॥
अकलैस्त्रितये[1]ऽप्यस्मिंस्तिरोभावनशीलया ।
शिवशक्त्योभया[2]क्रान्ताः प्रकुर्वन्ति विचेष्टितम् ॥ ३६ ॥
एवं जगति सर्वत्र रुद्राणां योग्यता[3]वशात् ।
अङ्गुष्ठमात्रपूर्वाणां शतमष्टादशोत्तरम् ॥ ३७ ॥
अनुगृह्य शिवः साक्षान्मन्त्रेशत्वे नियुक्तवान् ।
ते स्वगोचरमासाद्य भुक्तिमुक्तिफलार्थिनाम् ॥ ३८ ॥
ब्रह्मादीनां प्रयच्छन्ति स्वबलेन समं फलम् ।
ऋषिभ्यस्तेऽपि ते चानु मन्वन्तेभ्यो महाधिपाः ॥ ३९ ॥
हेयोपादेयविज्ञानं कथयन्ति शिवोदितम् ।
ब्रह्मादिस्तम्बपर्यन्ते जातमात्रे जगत्यलम् ॥ ४० ॥
मन्त्राणां कोटयस्तिस्रः सार्धाः शिवनियोजिताः ।
अनुगृह्याणुसंघातं याताः पदमनामयम् ॥ ४१ ॥
एवमस्यात्मनः काले कस्मिंश्चिद्योग्यतावशात् ।
शैवी संबध्यते शक्तिः शान्ता मुक्तिफलप्रदा ॥ ४२ ॥

---

१ ख० पु० अवस्थात्रितय इति पाठः । २ ख० पु० शक्त्युभयेति पाठः ।
३ ख० पु० कर्तृतावशादिति पाठः ।

तत्संबन्धात्ततः कश्चित्तत्क्षणादपवृज्यते ।
अज्ञानेन सहैकत्वं कस्यचिद्विनिवर्तते ॥ ४३ ॥

रुद्रशक्तिसमाविष्टः स यियासुः शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति ॥ ४४ ॥

तमाराध्य ततस्तुष्टाद्दीक्षामासाद्य शाङ्करीम् ।
तत्क्षणाद्वोपभोगाद्वा देहपाताच्छिवं व्रजेत् ॥ ४५ ॥

योगदीक्षां समासाद्य ज्ञात्वा योगं समभ्यसेत् ।
योगसिद्धिमवाप्नोति तदन्ते शाश्वतं पदम् ॥ ४६ ॥

अनेन क्रमयोगेन संप्राप्तः परमं पदम् ।
न भूयः पशुतामेति शुद्धे स्वात्मनि तिष्ठति ॥ ४७ ॥

आत्मा चतुर्विधो ह्येष पुनरेष चतुर्विधः ।
आचार्यत्वादिभेदेन शुद्धात्मा परिपठ्यते ॥ ४८ ॥

नित्यादित्रितयं कुर्याद्गुरुः साधक एव च ।
नित्यमेव द्वयं चान्यद्यावज्जीवं शिवाज्ञया ॥ ४९ ॥

उपादेयं च हेयं च तदेतत्परिकीर्तितम् ।
ज्ञात्वैतज्ज्ञेयसर्वस्वं सर्वसिद्ध्यर्हो भवेत् ॥ ५० ॥

इति श्रीमालिनीविजयोत्तरे प्रथमोऽधिकारः ॥ १ ॥

---

१ ख० पु० उपयोगाद्वेति पाठान्तरम् । २ क० पु० पाते शिवमिति पाठः ।
३ क० ख० सिद्धिफलं लभेत् इति पाठः ।

अथ

द्वितीयोऽधिकारः

अथैषामेव तत्त्वानां धरादीनामनुक्रमात् ।
प्रपञ्चः कथ्यते लेशाद्योगिनां योगसिद्धये ॥ १ ॥

शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते ।
स्वरूपसहितं तच्च विज्ञेयं दशपञ्चधा ॥ २ ॥

शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः ।
तच्छक्तयश्च विज्ञेयास्तद्वदेव विचक्षणैः ॥ ३ ॥

एवं जलादिमूलान्तं तत्त्वव्रातमिदं महत् ।
पृथग्भेदैरिमैर्भिन्नं विज्ञेयं तत्फलेप्सुभिः ॥ ४ ॥

अनेनैव विधानेन पुंस्तत्त्वात्तु[1] कलान्तिकम् ।
त्रयोदशविधं ज्ञेयं रुद्रवत्प्रलयाकलाः ॥ ५ ॥

तद्वन्मायापि विज्ञेया नवधा ज्ञानकेवलाः ।
मन्त्राः सप्तविधास्तद्वत्पञ्चधा[2] मन्त्रनायकाः ॥ ६ ॥

त्रिधा मन्त्रेश्वरेशानाः शिवः साक्षान्न भिद्यते ।
भेदः प्रकथितो लेशादनन्तो विस्तरादयम् ॥ ७ ॥

एवं भुवनमालापि भिन्ना भेदैरिमैः स्फुटम् ।
विज्ञेया योगसिद्ध्यर्थं योगिभिर्योगपूजिता ॥ ८ ॥

---

१ तं० पुंस्तत्त्वात्तत्कलान्तकमिति पाठः । २ तं० पञ्च मन्त्रविनायका इति पाठः ।

एतेषामेव तत्त्वानां भुवनानां च शाङ्करि ।
य एकमपि जानाति सोऽपि योगफलं लभेत् ॥ ९ ॥
यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः ।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः ॥ १० ॥
स्पृष्टाः संभाषितास्तेन दृष्टाश्च प्रीतचेतसा ।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥ ११ ॥
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः ।
ते यथेष्टं फलं प्राप्य पदं [४]गच्छन्त्यनामयम् ॥ १२ ॥
रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः ।
सति तस्मिंश्च चिह्नानि तस्यैतानि विलक्षयेत् ॥ १३ ॥
तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला ।
द्वितीयं मन्त्रसिद्धिः स्यात्सद्यः प्रत्ययकारिका ॥१४॥
सर्वसत्त्ववशित्वं च तृतीयं लक्षणं स्मृतम् ।
प्रारब्धकार्यनिष्पत्तिश्चिह्नमाहुश्चतुर्थकम् ॥ १५ ॥
कवित्वं पञ्चमं ज्ञेयं सालङ्कारं मनोहरम् ।
सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते ॥ १६ ॥
रुद्रशक्तिसमावेशः पञ्चधा परिपठ्यते ।
भूततत्त्वात्ममन्त्रेशशक्तिभेदाद्वरानने ॥ १७ ॥

---

३ ख० पु० संभाविता इति पाठः । ४ ख० पु० गच्छन्ति परमं पदमिति पाठः

पञ्चधा भूतसंज्ञस्तु तथा त्रिंशतिधा परः ।
आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसंज्ञकः ॥१८॥
द्विविधः शक्तिसंज्ञोऽपि ज्ञातव्यः परमार्थतः ।
पञ्चाशद्भेदभिन्नोऽयं समावेशः प्रकीर्तितः ॥ १९ ॥
आणवोऽयं समाख्यातः शाक्तोऽप्येवंविधः स्मृतः ।
एवं शाम्भवमप्येभिर्भेदैर्भिन्नं विलक्षयेत् ॥ २० ॥
उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः[1] ।
यो भवेत्स समावेशः सम्यगाणव उच्यते ॥ २१ ॥
उच्चाररहितं वस्तु चेतसैव विचिन्तयन् ।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ॥ २२ ॥
अकिंचिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः ।
जायते[2] यः समावेशः शाम्भवोऽसावुदाहृतः[3] ॥ २३ ॥
सार्धमेतच्छतं प्रोक्तं भेदानामनुपूर्वशः ।
संक्षेपाद्विस्तरादस्य परिसंख्या न विद्यते ॥ २४ ॥
संवित्तिफलभेदोऽत्र न प्रकल्प्यो मनीषिभिः ।
भेदोऽपरोऽपि संक्षेपात्कथ्यमानोऽवधार्यताम् ॥ २५ ॥
जाग्रत्स्वप्नादिभेदेन सर्वावेशक्रमो बुधैः ।
पञ्चभिस्तु परिज्ञेयः स्वैर्व्यापारात्पृथक्[4] पृथक् ॥२६॥

---

१ ग० पु० विकल्पनैरिति पाठः । २ वि० मै० उत्पद्यते य आवेश इति पाठः ।
३ ग० पु० उदीरित इति पाठः । ४ ख० पु० भेदैश्चान्यैः पृथगिति पाठः ।

तत्र स्वरूपं शक्तिश्च सकलश्चेति तत्त्रयम् ।
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके ॥ २७ ॥
अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः ।
मन्त्रादितत्पतीशानवर्गस्तुर्य इति स्मृतः ॥ २८ ॥
शक्तिशंभू परिज्ञेयौ तुर्यातीते वरानने ।
त्रयोदशात्मके भेदे स्वरूपसंकलावुभौ[1] ॥ २९ ॥
मन्त्रमन्त्रेश्वरेशानाः शक्तिशंभू च कीर्तितौ ।
प्रलयाकलभेदेऽपि स्वं विज्ञानकलावुभौ ॥ ३० ॥
मन्त्रमन्त्रेश्वरेशानाः शक्तीशावपि पूर्ववत् ।
नवधा कीर्तिते भेदे स्वं मन्त्राः मन्त्रनायकाः ॥३१॥
तदीशाः शक्तिशंभू च पञ्चावस्थाः प्रकीर्तिताः ।
पूर्ववत्सप्तभेदेऽपि स्वं मन्त्रेशेशशक्तयः ॥ ३२ ॥
शिवश्चेति परिज्ञेयाः पञ्चैव वरवर्णिनि ।
स्वं शक्तिः स्वा[2] निजेशाना शक्तिशंभू च पञ्चके ॥३३॥
त्रिके स्वं शक्तिशक्तीच्छाशिवभेदं विलक्षयेत् ।
सव्यापाराधिपत्वेन तद्धीनप्रेरकत्वतः ॥ ३४ ॥
इच्छानिवृत्तेः स्वस्थत्वादभिन्नमपि[3] पञ्चधा ।
इति पञ्चात्मके[4] भेदे विज्ञेयं वस्तु कीर्तितम् ॥ ३५ ॥

---

१ ग० पु० स्वरूपमकलाविति पाठः । २ क० पु० स्वनिजेति पाठः ।
३ तं० अभिन्नं चेति इति पाठः । ४ क० पु० पञ्चात्मभेदेनेति पाठः ।

भूयोऽप्यासामवस्थानां संज्ञाभेदः प्रकाश्यते ।
पिण्डस्थः सर्वतोभद्रो जाग्रन्नाम द्वयं मतम् ॥ ३६ ॥
द्विसंज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि ।
रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्द्वयम् ॥ ३७ ॥
प्रचयं रूपातीतं च सम्यक् तुर्यमुदाहृतम् ।
महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः ॥ ३८ ॥
पृथक्त्त्वप्रभेदेन भेदोऽयं समुदाहृतः ।
सर्वाण्येव हि तत्त्वानि पञ्चैतानि यथा शृणु ॥ ३९ ॥
भूततत्त्वाभिधानानां योगोऽधिष्ठेय इष्यते[1] ।
पिण्डस्थमिति तं प्राहुः पदस्थमपरं विदुः ॥ ४० ॥
मन्त्रास्तत्पतयः सेशा रूपस्थमिति कीर्त्यते ।
रूपातीतं परा शक्तिः सव्यापाराप्यनामया ॥ ४१ ॥
निष्प्रपञ्चो निराभासः शुद्धः स्वात्मन्यवस्थितः ।
सर्वातीतः शिवो ज्ञेयो यं विदित्वा विमुच्यते ॥ ४२ ॥
चतुर्विधं तु पिण्डस्थमबुद्धं बुद्धमेव च ।
प्रबुद्धं सुप्रबुद्धं च पदस्थं च चतुर्विधम् ॥ ४३ ॥
गतागतं सुविक्षिप्तं संगतं सुसमाहितम् ।
चतुर्धा रूपसंज्ञं[2] तु ज्ञातव्यं योगचिन्तकैः ॥ ४४ ॥

---

१ ग० पु० उच्यते इति पाठः । २ तं० संस्थमिति पाठः ।

उदितं विपुलं शान्तं सुप्रसन्नमथापरम् ।
मनोन्मनमनन्तं च सर्वार्थं सततोदितम् ॥ ४५ ॥
प्रचये तत्र संज्ञेयमेकं तन्महसि स्थितम् ।
इत्येवं पञ्चधाध्वानं त्रिधेदानीं निगद्यते ॥ ४६ ॥
विज्ञानाकलपर्यन्तमात्मतत्त्वमुदाहृतम् ।
ईश्वरान्तं च विद्याह्वं शेषं शिवपदं विदुः ॥ ४७ ॥
एवं भेदैरिमैर्भिन्नस्तत्राध्वा परिकीर्तितः ।
युगपत्सर्वमार्गाणां प्रभेदः प्रोच्यतेऽधुना ॥ ४८ ॥
पार्थिवं प्राकृतं चैव मायीयं शाक्तमेव च ।
इति संक्षेपतः प्रोक्तमेतदण्डचतुष्टयम् ॥ ४९ ॥
पृथग्द्वयमसंख्यातमेकमेकं पृथक् पृथक् ।
आद्यं धारिकया व्याप्तं तत्रैकं तत्त्वमिष्यते ॥ ५० ॥
एकमेकं पृथक् क्षार्णं पदार्णमनुषु स्मरेत् ।
कालाग्निभुवनाद्यावद्वीरभद्रपुरोत्तमम् ॥ ५१ ॥
पुरषोडशकं ज्ञेयं पञ्चिभोऽध्वा प्रकीर्तितः ।
आप्यायिन्या द्वितीयं च तत्र तत्त्वानि लक्षयेत् ॥५२॥
त्रयोविंशत्यवादीनि तद्वद्दाद्यक्षराणि च ।
पदानि पञ्च मन्त्राश्च षट्पञ्चाशत्पुराणि च ॥ ५३ ॥

---

१ क० पु० महति इति पाठः ।

तत्त्वानि सप्त बोधिन्या तच्चतुर्धा पुराणि च ।
तृतीये सप्त वर्णाः स्युः पदमन्त्रद्वयं द्वयम् ॥ ५४ ॥
उत्पूयिन्या चतुर्थं तु तत्र तत्त्वत्रयं विदुः ।
वर्णत्रयं मन्त्रमेकं पदमेकं च लक्षयेत् ॥ ५५ ॥
अष्टादश विजानीयाद्भुवनानि समासतः ।
शिवतत्त्वं परं शान्तं कला तत्रावकाशदा ॥ ५६ ॥
स्वरषोडशकं मन्त्रं पदं चैकं विलक्षयेत् ।
इत्येवं षड्विधोऽप्यध्वा समासात्परिकीर्तितः ॥ ५७ ॥
शुद्धाशुद्धं जगत्सर्वं ब्रह्माण्डप्रभवं यतः ।
तस्माच्छुद्धमिमैः शुद्धैर्ब्रह्माण्डैः सर्वमिष्यते ॥ ५८ ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्चेति सुव्रते ।
पृथगेतेषु बोद्धव्यं शान्तं पतिचतुष्टयम् ॥ ५९ ॥
यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते ।
एतत्ते कथितं सर्वं किमन्यत्परिपृच्छसि ॥ ६० ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे व्याप्त्यधिकारो द्वितीयः ॥ २ ॥

अथ

तृतीयोऽधिकारः ।

एवमुक्ता महादेवी जगदानन्दकारिणा ।
प्रणिपत्य पुनर्वाक्यमिदमाह जगत्पतिम् ॥ १ ॥
एवमेतन्महादेव नान्यथा समुदाहृतम् ।
यथाख्यातं तथा ज्ञातमादितः समनुक्रमात् ॥ २ ॥
शिवादिवस्तुरूपाणां वाचकान्परमेश्वर ।
सांप्रतं श्रोतुमिच्छामि प्रसदाद्वक्तुमर्हसि ॥ ३ ॥
इत्युक्तः स महेशान्या जगदार्तिहरो हरः ।
वाचकानवदन्मन्त्रान्पारम्पर्यक्रमागतान् ॥ ४ ॥
या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥ ५ ॥
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु ।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ॥ ६ ॥
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ।
एवंभूतमिदं वस्तु भवत्विति यदा पुनः ॥ ७ ॥

---

१ स्प० प्र० एवंभूतमिदं सर्वमिति कार्योन्मुखी यदा इति पाठः ।

ज्ञाता तदेव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते ।
एवं सैषा द्विरूपापि पुनर्भेदैरनेकताम्[1][2] ॥ ८ ॥

अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी ।
तत्र तावत्समापन्ना[3] मातृभावं विभिद्यते ॥ ९ ॥

द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी ।
बीजयोन्यात्मकाद्भेदाद्द्विधा बीजं स्वरा मताः ॥१०॥

कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः ।
प्रति[4]वर्णविभेदेन शतार्धकिरणोज्ज्वला ॥ ११ ॥

बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते ।
वाचकत्वेन सर्वापि शंभोः शक्तिश्च शस्यते ॥ १२ ॥

वर्गाष्टकमिह ज्ञेयमघोराद्यमनुक्रमात् ।
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम् ॥ १३ ॥

माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा ।
ऐन्द्री याम्या च चामुण्डा योगीशी चेति ता मताः ॥१४॥

शतार्धभेदभिन्नानां तत्संख्यानां वरानने ।
रुद्राणां वाचकत्वेन कल्पिताः परमेष्ठिना ॥ १५ ॥

---

१ क० पु० एवमेषेति पाठः । २ क० पु० भेदैरनन्ततामिति पाठः ।
३ शि० वि० समापन्नमातृभावा, इति पाठः । ४ शि० वि० पृथग्वर्णविभेदेनेति पाठः ।

तद्वदेव च शक्तीनां तत्संख्यानमनुक्रमात् ।
सर्वं च कथयिष्यामि तासां भेदं यथा शृणु ॥ १६ ॥
अमृतोऽमृतपूर्णश्च अमृताभोऽमृतद्रवः ।
अमृतौघोऽमृतोर्मिश्च अमृतस्यन्दनोऽपरः ॥ १७ ॥
अमृताङ्गोऽमृतवपुरमृतोद्गार एव च ।
अमृतास्योऽमृततनुस्तथा चामृतसेचनः ॥ १८ ॥
तन्मूर्तिरमृतेशश्च सर्वामृतधरोऽपरः ।
षोडशैते समाख्याता रुद्रबीजसमुद्भवाः ॥ १९ ॥
जयश्च विजयश्चैव जयन्तश्चापराजितः ।
सुजयो जयरुद्रश्च जयकीर्तिर्जयावहः ॥ २० ॥
जयमूर्तिर्जयोत्साहो जयदो जयवर्धनः ।
बलश्चातिबलश्चैव बलभद्रो बलप्रदः ॥ २१ ॥
बलावहश्च बलवान् बलदाता बलेश्वरः ।
नन्दनः सर्वतोभद्रो भद्रमूर्तिः शिवप्रदः ॥ २२ ॥
सुमनाः स्पृहणो दुर्गो भद्रकालो मनोनुगः ।
कौशिकः कालविश्वेशौ सुशिवः कोप एव च ॥ २३ ॥
एते योनिसमुद्भूताश्चतुस्त्रिंशत्मकीर्तिताः ।
स्त्रीपाठवशमापन्ना एत एवात्र शक्तयः ॥ २४ ॥

---

१ क० पु० जयभद्र इति पाठः ।

बीजयोनिसमुद्भूता रुद्रशक्तिसमाश्रयाः ।
वाचकानामनन्तत्वात्परिसंख्या न विद्यते ॥ २५ ॥
सर्वशास्त्रार्थगर्भिण्या इत्येवंविधयानया ।
अघोरं बोधयामास स्वेच्छया परमेश्वरः ॥ २६ ॥
स तया संप्रबुद्धः सन्योनिं विक्षोभ्य शक्तिभिः ।
तत्समानश्रुतीन्वर्णांस्तत्संख्यानसृजत्प्रभुः ॥ २७ ॥
ते[1] तैरालिङ्गिताः सन्तः सर्वकामफलप्रदाः ।
भवन्ति साधकेन्द्राणां नान्यथा वीरवन्दिते ॥ २८ ॥
तैरिदं संततं विश्वं सदेवासुरमानुषम् ।
तेभ्यः शास्त्राणि वेदाश्च संभवन्ति पुनः पुनः ॥२९॥
अनन्तस्यापि भेदस्य शिवशक्तेर्महात्मनः ।
कार्यभेदान्महादेवि त्रैविध्यं समुदाहृतम् ॥ ३० ॥
विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून् ।
रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः॥३१॥
मिश्रकर्मफलासक्तिं पूर्ववज्जनयन्ति याः ।
मुक्तिमार्गनिरोधिन्यस्ताः स्युर्घोराः परापराः ॥३२॥
पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः ।
पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः ॥ ३३ ॥

---

१ क० पु० तैस्तैरिति पाठः ।

एताः सर्वाणुसंघातमपि निष्ठा [धिष्ठाय] यथा स्थिताः ।
तथा ते कथिताः शंभोः शक्तिरेकैव शाङ्करी ॥ ३४ ॥
अस्या वाचकभेदेन भेदोऽन्यः संप्रचक्ष्यते ।
यथेष्टफलसंसिद्ध्यै मन्त्रातन्त्रानुवर्तिनाम् ॥ ३५ ॥
विशेषविधिहीनेषु न्यासकर्मसु मन्त्रवित् ।
न्यसेच्छाक्तशरीरार्थं भिन्नयोनिं तु मालिनीम् ॥३६॥
न शिखा ऋॠ ऌॡ च शिरोमाला थ मस्तकम् ।
नेत्राणि च ध वै नासा ई समुद्रे णुणू श्रुती ॥ ३७ ॥
वकुवर्गइआ वक्त्रदन्तजिह्वासु वाचि च ।
वभयाः कण्ठदक्षादिस्कन्धयोर्भुजयोर्डढौ ॥ ३८ ॥
ठो हस्तयोर्झञौ शाखा ञटौ शूलकपालके ।
पहृच्छलौ स्तनौ क्षीरमा स जीवो विसर्गयुक् ॥३९॥
तत्परः कथितः प्राणः पक्षावुदरनाभिगौ ।
मशंताः कटिगुह्योरुयुग्मगा जानुनी तथा ॥ ४० ॥
एऐकारौ तथा जङ्घे तत्परौ चरणौ दफौ ।
अतो विद्याश्च मन्त्राश्च समुद्धार्या यथा शृणु ॥४१॥
सबिन्दुकां दक्षजङ्घां ततो वाचं प्रकल्पयेत् ।
तथैव जङ्घया युक्तं चतुर्थं दशनं ततः ॥ ४२ ॥
दक्षजानुयुतं दण्डं प्राणं दण्डस्थमीयुतम् ।
पृथग् घृदण्डकटिगा द्विजदण्डौ च पूर्ववत् ॥ ४३ ॥

उत्थितं विन्दुयुक्प्राणं पूर्ववद्दशनं ततः ।
दण्डं केवलमुद्धृत्य वाममुद्रान्वितं पुनः ॥ ४४ ॥
दक्षजानुयुतं ह्वच प्राणं जीवात्मना युतम् ।
दशनं पूर्ववन्न्यस्य दण्डं केवलमेव च ४५ ॥
नितम्बं दक्षमुद्रेतं द्वितीयं जिह्वया द्विजम् ।
सनासं दक्षशिखरं नितम्बं केवलं ततः ॥ ४६ ॥
पुनस्तथैव शिखरं जठरं केवलं ततः ।
दक्षजानुयुतं कर्णं कण्ठं केवलमेवच ॥ ४७ ॥
नितम्बं केवलं न्यस्य हृदयं जिह्वया युतम् ।
वक्त्रं केवलमुद्धृत्य प्राणमाद्येन जानुना ॥ ४८ ॥
शूलदण्डचतुष्कं च तत्राद्यं द्वयसंस्थि[मुत्थि]तम् ।
वामपादं च तस्यान्ते कपालं पतितं न्यसेत् ॥ ४९ ॥
ततः परमघोरान्तं पाद्यकाद्ये च पूर्ववत् ।
परापरा समाख्याता अपरा च प्रकथ्यते ॥ ५० ॥
अघोरान्तं न्यसेदादौ प्राणं विन्दुयुतं पुनः ।
वाममुद्रान्वितं न्यस्य पाद्यं काद्येन पूर्ववत् ॥ ५१ ॥
अपरेयं समाख्याता रुद्रशक्तिं परां शृणु ।
मन्त्राः संमुखतां यान्ति ययोच्चारितमात्रया ॥ ५२ ॥

---

१ ग० पाद्यकाद्ये चेति पाठः ।

कम्पते गात्रयष्टिश्च द्रुतं चोत्पतनं भवेत् ।
मुद्रावन्धं च गेयं च शिवारुदितमेव च ॥ ५३ ॥
अतीतानागतार्थस्य कुर्याद्वा कथनादिकम् ।
वामजङ्घान्वितो जीवः पारम्पर्यक्रमागतः ॥ ५४ ॥
परेयमनया सिद्धिः सर्वकामफलप्रदा ।
नाशिष्याय प्रदेयेयं नाभक्ताय कदाचन ॥ ५५ ॥
रुद्रश्च रुद्रशक्तिश्च गुरुश्चेति त्रयं समम् ।
भक्त्या प्रपश्यते यस्तु तस्मै देयं वरानने ॥ ५६ ॥
शिष्येणापि तदा ग्राह्या यदा संतोषितो गुरुः ।
शरीरद्रव्यविज्ञानशुद्धिकर्मगुणादिभिः ॥ ५७ ॥
वोधिता तु यदा तेन गुरुणा हृष्टचेतसा ।
तदा सिद्धिप्रदा ज्ञेया नान्यथा वीरवन्दिते ॥ ५८ ॥
परापराङ्गसंभूता योगिन्योऽष्टौ महावलाः ।
पञ्च षट् पञ्च चत्वारि द्वित्रित्र्यर्णाः क्रमेण तु ॥ ५९ ॥
ज्ञेयाः सप्तैकादशार्णा एकार्धार्णद्वयान्विताः ।
जीवो दीर्घस्वरैः षड्भिः पृथग्जातिसमन्वितः ॥ ६० ॥
विद्यात्रयस्य गात्राणि ह्रस्वैर्वक्त्राणि पञ्चभिः ।
ओंकारैः पञ्चभिर्मन्त्रो विद्याङ्गहृदयं भवेत् ॥ ६१ ॥

---

१ क० ख० पु० जातिविभेदत इति पाठः ।

ओं अमृते तेजोमालिनि स्वाहापदानि [दत्त्वि] भूषितम् ।
एकादशाक्षरं प्रोक्तमेतद्ब्रह्मशिरः प्रिये ॥ ६२ ॥
वेदवेदिनि हूँफट् च प्रणवादिसमन्विता ।[1]
रुद्राण्यष्टाक्षरा ज्ञेया शिखा विद्यागणस्य तु ॥ ६३ ॥
चज्रिणे वज्रधराय स्वाहान्तं प्रणवादिकम् ।
एकादशाक्षरं वर्म पुरुष्टुतमिति स्मृतम् ॥ ६४ ॥
श्रीपदं पशुशब्दं[2] च हूंफडन्तं भवादिकम् ।
एतत्पाशुपतं प्रोक्तमर्धसप्ताक्षरं परम् ॥ ६५ ॥
लरटक्षवयैर्दीर्घैः सहयुक्तैः सबिन्दुकैः ।
इन्द्रादीन्कल्पयेद्ध्रस्वैस्तदस्त्राणि विचक्षणः ॥ ६६ ॥
तद्वन्नासापयोभ्यां तु कल्प्यौ विष्णुप्रजापती ।
स्वरावाद्यतृतीयौ तु वाचकौ पद्मचक्रयोः ॥ ६७ ॥
इति मातृगणः[3] प्रोक्तः सर्वकामफलप्रदः ।
योगिनां योगसिद्ध्यर्थं किमन्यत्परिपृच्छसि ॥ ६८ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे मन्त्रोद्धाराधिकारस्तृतीयः ॥ ३ ॥

---

१ ग० पु० युता शिखेति पाठः । २ ग० पु० श्लशब्दमिति पाठः ।
३ ग० पु० मन्त्रगण इति पाठः ।

अथ

चतुर्थोऽधिकारः ।

अथैतदुपसंश्रुत्य मुनयो मुदितेक्षणाः ।
प्रणम्य क्रौञ्चहन्तारं पुनरूचुरिदं वचः ॥ १ ॥

योगमार्गविधिं देव्या पृष्टेन परमेष्ठिना ।
तत्प्रतिज्ञावताप्युक्तं किमर्थं मन्त्रलक्षणम् ॥ २ ॥

एवमुक्तः स तैः सम्यक्कार्तिकेयो महामतिः ।
इदमाह वचस्तेषां संदेहविनिवृत्तये ॥ ३ ॥

योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना ।
यद्वस्तु ज्ञेयमित्युक्तं हेयत्वादिप्रसिद्धये ॥ ४ ॥

द्विरूपमपि तज्ज्ञानं विना ज्ञातुं न शक्यते ।
तत्प्रसिद्ध्यै शिवेनोक्तं ज्ञानं यदुपवर्णितम् ॥ ५ ॥

सबीजयोगसंसिद्ध्यै मन्त्रलक्षणमप्यलम् ।
न चाधिकारिता दीक्षां विना योगेऽस्ति शाङ्करे॥६॥

क्रियाज्ञानविभेदेन सा च द्वेधा निगद्यते ।
द्विविधा सा प्रकर्तव्या तेन चैतदुदाहृतम् ॥ ७ ॥

न च योगाधिकारित्वमेकमेवानया भवेत् ।
अपि मन्त्राधिकारित्वं मुक्तिश्च शिवदीक्षया ॥ ८ ॥

श्रुत्वा चैतत्पतेर्वाक्यं रोमाञ्चितशरीरिणी ।
इदमाह पुनर्वाक्यमम्बा मुनिवरोत्तमाः ॥ ९ ॥
अभिन्नमालिनीकाये तत्त्वानि भुवनानि च ।
कलाः पदानि मन्त्राश्च यथावदवधारिताः ॥ १० ॥
भिन्नयोनिस्तु या देव त्वयोक्ता मालिनी मम ।
तस्या अङ्गे यथैतानि संस्थितानि तथा वद ॥ ११ ॥
एवमुक्तो महादेव्या भैरवो भूरिभोगदः ।
स्फुरद्धिमांशुसंतानप्रकाशितदिगन्तरः ॥ १२ ॥
सुरासुरशिरोमौलिमालालालितशासनः ।
उवाच मधुरां वाचमिमामक्लेशिताशयाम् ॥ १३ ॥
या मया कथिता देवि भिन्नयोनिस्तु मालिनी ।
तदङ्गे संप्रवक्ष्यामि सर्वमेतद्यथा स्थितम् ॥ १४ ॥
फे धरातत्त्वमुद्दिष्टं दादिझान्तेऽनुपूर्वशः ।
त्रयोविंशत्यबादीनि प्रधानान्तानि लक्षयेत् ॥ १५ ॥
ठादौ च सप्तके सप्त पुरुषादीनि पूर्ववत् ।
ङञयेषु त्रयं विद्याद्विद्यातः सकलावधि ॥ १६ ॥
शिवतत्त्वे गकारादिनान्तान् षोडश लक्षयेत् ।
कलाः पदानि मन्त्राश्च भुवनानि च सुन्दरि ॥ १७ ॥
पूर्ववद्वेदितव्यानि तत्संख्यार्णविभेदतः ।
विद्यात्रयविभागेन यथेदानीं तथा शृणु ॥ १८ ॥

निष्कले पदमेकार्णं त्र्यर्णैकार्णमिति द्वयम् ।
सकले तु परिज्ञेयं पञ्चैकार्णद्वयं द्वये ॥ १९ ॥
चतुरेकाक्षरे द्वे च मायादित्रितये मते ।
चतुरक्षरमेकं च कालादिद्वितये मतम् ॥ २० ॥
रञ्जके त्र्यर्णमुद्दिष्टं प्रधाने त्र्यर्णमिष्यते ।
बुद्धौ देवाष्टकव्याप्त्या पदं त्र्यक्षरमिष्यते ॥ २१ ॥
ततः पञ्चाष्टकव्याप्त्या त्र्येकद्वित्र्यक्षराणि तु ।
विद्यापदानि चत्वारि सार्धवर्णं तु पञ्चमम् ॥ २२ ॥
एकैकसार्धवर्णानि[2] त्रीणि तत्त्वे तु पार्थिवे ।
पुंरागे[3] सर्वमन्यच्च वर्णमन्त्रकलादिकम् ॥ २३ ॥
सार्धेनाण्डद्वयं व्याप्तमेकैकेन पृथग्द्वयम् ।
अपरायाः समाख्याता व्याप्तिरेषा विलोमतः ॥ २४ ॥
सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम् ।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते ॥ २५ ॥
एतत्सर्वं परिज्ञेयं योगिना हितमिच्छता ।
आत्मनो वा परेषां वा नान्यथा तदवाप्यते ॥ २६ ॥
द्वावेव मोक्षदौ ज्ञेयौ ज्ञानी योगी च शाङ्करि ।
पृथक्त्वात्तत्र....वोद्धव्यं फलकाङ्क्षिभिः ॥ २७ ॥

---

१ क० पु० मथेति पाटः । २ क० ख० ग० एकार्द्धसार्धेति पाटः ।
३ ग० पु पुराङ्गे इति पाठः ।

ज्ञानं तत्त्रिविधं प्रोक्तं तत्राद्यं श्रुतमिष्यते।
चिन्तामयमथान्यच्च भावनामयमेव च ॥ २८ ॥

शास्त्रार्थस्य परिज्ञानं विक्षिप्तस्य श्रुतं मतम्।
इदमत्रेदमत्रेति इदमत्रोपयुज्यते ॥ २९ ॥

सर्वमालोच्य शास्त्रार्थमानुपूर्व्या व्यवस्थितम्।
तद्वच्चिन्तामयं ज्ञानं द्विरूपमुपदिश्यते ॥ ३० ॥

मन्दस्वभ्यस्तभेदेन तत्र स्वभ्यस्तमुच्यते।
सुनिष्पन्ने ततस्तस्मिज्जायते भावनामयम् ॥ ३१ ॥

यतो योगं समासाद्य योगी योगफलं लभेत्।
एवं विज्ञानभेदेन ज्ञानी प्रोक्तश्चतुर्विधः ॥ ३२ ॥

संप्राप्तो घटमानश्च सिद्धः सिद्धतमोऽन्यथा।
योगी चतुर्विधो देवि यथावत्प्रतिपद्यते ॥ ३३ ॥

समावेशोक्तिवद्योगस्त्रिविधः समुदाहृतः।
तत्र प्राप्तोपदेशस्तु पारम्पर्यक्रमेण यः ॥ ३४ ॥

प्राप्तयोगः स विज्ञेयस्त्रिविधोऽपि मनीषिभिः।
चेतसो घटनं तत्त्वाच्चलितस्य पुनः पुनः ॥ ३५ ॥

यः करोति तमिच्छन्ति घटमानं मनीषिणः।
तदेव चेतसा नान्यद्द्वितीयमवलम्बते ॥ ३६ ॥

सिद्धयोगस्तदा ज्ञेयो योगी योगफलार्थिभिः।
यः पुनर्यत्र तत्रैव संस्थितोऽपि यथा तथा ॥ ३७ ॥

भुञ्जानस्तत्फलं तेन हीयते न कथंचन ।
सुसिद्धः स तु बोद्धव्यः सदाशिवसमः प्रिये ॥ ३८ ॥
उत्तरोत्तरवैशिष्ट्यमेतेषां समुदाहृतम् ।
ज्ञानिनां योगिनां चैव सिद्धो योगविदुत्तमः ॥३९॥
यतोऽस्य ज्ञानमप्यस्ति पूर्वो योगफलोज्झितः ।
यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान्बुधैः ॥ ४० ॥
इत्येतत्कथितं सर्वं विज्ञेयं योगिपूजिते ।
तन्त्रार्थमुपसंहृत्य समासाद्योगिनां हितम् ॥ ४१ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे चतुर्थोऽधिकारः ॥ ४ ॥

अथ

पञ्चमोऽधिकारः ।

अथातः संप्रवक्ष्यामि भुवनाध्वानमीश्वरि ।
आदौ कालाग्निभुवनं शोधितव्यं प्रयत्नतः ॥ १ ॥

अवीचिः कुम्भीपाकश्च रौरवश्च तृतीयकः ।
कूष्माण्डभुवने शुद्धे सर्वे शुद्धा न संशयः ॥ २ ॥

पातालानि ततः सप्त तेषामादौ महातलम् ।
रसातलं ततश्चान्यत्तलातलमतः परम् ॥ ३ ॥

सुतलं नितलं चेति वितलं तलमेव च ।
हाटकेन विशुद्धेन सर्वेषां शुद्धिरिष्यते ॥ ४ ॥

तदूर्ध्वं पृथिवी ज्ञेया सप्तद्वीपार्णवान्विता ।
देवानामाश्रयो मेरुस्तन्मध्ये संव्यवस्थितः ॥ ५ ॥

भुवोलोकस्तदूर्ध्वे च स्वर्लोकस्तस्य चोपरि ।
महो जनस्तपः सत्यमित्येतल्लोकसप्तकम् ॥ ६ ॥

चतुर्दशविधो यत्र भूतग्रामः प्रवर्तते ।
स्थावरः सर्पजातिश्च पक्षिजातिस्तथापरा ॥ ७ ॥

मृगसंज्ञश्च पश्वाख्यः पञ्चमोऽन्यश्च मानुषः ।
पैशाचो राक्षसो याक्षो गान्धर्वश्चैन्द्र एव च ॥ ८ ॥

सौम्यश्च प्राजापत्यश्च ब्राह्मश्चात्र चतुर्दश ।
सर्वस्यैवास्य संशुद्धिर्ब्राह्मे संशोधिते सति ॥ ९ ॥

भुवनं वैष्णवं तस्मान्मदीयं तदनन्तरम् ।
तत्र शुद्धे भवेच्छुद्धं सर्वमेतन्न संशयः ॥ १० ॥

कालाग्निपूर्वकैरेभिर्भुवनैः पञ्चभिः प्रिये ।
शुद्धैः सर्वमिदं शुद्धं ब्रह्माण्डान्तर्व्यवस्थितम् ॥ ११ ॥

तद्बहिः शतरुद्राणां भुवनानि पृथक् पृथक् ।
दश संशोधयेत्पश्चादेकं तन्नायकाष्टतम् ॥ १२ ॥

अनन्तः प्रथमस्तेषां कपालीशस्तथापरः ।
अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च ॥ १३ ॥

शीघ्रो निधीश्वरश्चैव सर्वविद्याधिपोऽपरः ।
शंभुश्च वीरभद्रश्च विधूमज्वलनप्रभः ॥ १४ ॥

एभिर्दशैकसंख्यातैः शुद्धैः शुद्धं शतं मतम् ।
उपरिष्टात्पुरस्तेषामष्टकाः पञ्च संस्थिताः ॥ १५ ॥

लकुली भारभूतिश्च दिण्ड्यापाढी सपुष्करौ ।
नैमिषं च प्रभासं च अमरेशमथाष्टकम् ॥ १६ ॥

एतत्पत्यष्टकं प्रोक्तमतो गुह्यातिगुह्यकम् ।
तत्र भैरवकेदारमहाकालाः समध्यमाः ॥ १७ ॥

आम्रातिकेशजल्पेशश्रीशैलाः सहरीन्दवः ।
भीमेश्वरमहेन्द्राट्टहासाः सविमलेश्वराः ॥ १८ ॥

कनखलं नाखलं च कुरुक्षेत्रं गया तथा ।
गुह्यमेतत्तृतीयं तु पवित्रमधुनोच्यते ॥ १९ ॥

स्थाणुस्वर्णाक्षकावाद्यौ भद्रगोकर्णकौ परौ ।
महाकालाविमुक्तेशरुद्रकोट्यम्बरापदाः ॥ २० ॥

स्थूलः स्थूलेश्वरः शङ्कुकर्णकालञ्जरावपि ।
मण्डलेश्वरमाकोटदुरण्डछगलाण्डकौ ॥ २१ ॥

स्थाण्वष्टकमिति प्रोक्तमहंकारावधि स्थितम् ।
देवयोन्यष्टकं बुद्धौ कथ्यमानं मया शृणु ॥ २२ ॥

पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च ।
तथा सौम्यं समाजेशं ब्राह्ममष्टममिष्यते ॥ २३ ॥

योगाष्टकं प्रधाने तु तत्रादावकृतं भवेत् ।
कृतं च वैभवं ब्राह्मं वैष्णवं तदनन्तरम् ॥ २४ ॥

कौमारमौमं श्रैकण्ठमिति योगाष्टकं तथा ।
पुरुषे वामभीमोग्रभवेशानैकवीरकाः ॥ २५ ॥

प्रचण्डो माधवोऽजश्च अनन्तैकशिवावथ ।
क्रोधेशचण्डौ विद्यायां संवर्तो ज्योतिरेव च ॥ २६ ॥

कलातत्त्वे परिज्ञेयौ सुरपञ्चान्तकौ परे ।
एकवीरशिखण्डीशश्रीकण्ठाः कालमाश्रिताः ॥ २७ ॥

महातेजःप्रभृतयो मण्डलेशानसंज्ञकाः ।
मायातत्त्वे स्थितास्तत्र वामदेवभवोद्भवौ ॥ २८ ॥
एकपिङ्गेक्षणेशानभुवनेशपुरःसराः ।
अङ्गुष्ठमात्रसहिताः कालानलसमत्विषः ॥ २९ ॥
विद्यातत्त्वेऽपि पञ्चाहुर्भुवनानि मनीषिणः ।
तत्र हालाहलः पूर्वो रुद्रः क्रोधस्तथापरः ॥ ३० ॥
अम्बिका च अघोरा च वामदेवी च कीर्त्यते ।
ईश्वरे पिवनाद्याः स्युरघोरान्ता महेश्वराः ॥ ३१ ॥
रौद्री ज्येष्ठा च वामा च तथा शक्तिसदाशिवौ ।
एतानि सकले पञ्च भुवनानि विदुर्बुधाः ॥ ३२ ॥
एवं तु सर्वतत्त्वेषु शतमष्टादशोत्तरम् ।
भुवनानां परिज्ञेयं संक्षेपान्न तु विस्तरात् ॥ ३३ ॥
शुद्धेनानेन शुद्ध्यन्ति सर्वाण्यपि न संशयः ।
सर्वमार्गविशुद्धौ तु कर्तव्यायां महामतिः ॥ ३४ ॥
सकलावधि संशोध्य शिवे योगं प्रकल्पयेत् ।
बुभुक्षोः सकलं ध्यात्वा योगं कुर्वीत योगवित् ॥ ३५ ॥
इत्येष कीर्तितो मार्गो भुवनाख्यस्य मे मतः ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे भुवनाध्वाधिकारः पञ्चमः ॥ ५ ॥

---

१ क० ख० भुवनानि स्युरिति पाठः ।

अथ

षष्ठोऽधिकारः ।

अथास्य वस्तुजातस्य यथा देहे व्यवस्थितिः ।
क्रियते ज्ञानदीक्षासु तथेदानीं निगद्यते ॥ १ ॥
पादाधः पञ्चभूतानि व्याप्त्या द्व्यङ्गुलया न्यसेत् ।
धरातत्त्वं च गुल्फान्तमबादीनि ततः क्रमात् ॥ २ ॥
तद्वत्तदुपरिष्टात्तु पर्वषट्कावसानकम्[1] ।
पुंस्तत्त्वात्कलातत्त्वान्तं तत्त्वषट्कं विचिन्तयेत् ॥ ३ ॥
ततो मायादितत्त्वानि चत्वारि सुसमाहितः ।
चतुरङ्गुलया व्याप्त्या सकलान्तानि भावयेत् ॥ ४ ॥
शिवतत्त्वं ततः पश्चात्तेजोरूपमनाकुलम् ।
सर्वेषां व्यापकत्वेन सबाह्याभ्यन्तरं स्मरेत् ॥ ५ ॥
षट्त्रिंशत्तत्त्वभेदेन न्यासोऽयं समुदाहृतः ।
अधुना पञ्च तत्त्वानि यथा देहे तथोच्यते ॥ ६ ॥
नाभेरूर्ध्वं तु यावत्स्यात्पर्वषट्कमनुक्रमात् ।
धरातत्त्वेन गुल्फान्तं व्याप्तं शेषमिहाम्बुना ॥ ७ ॥
द्वाविंशतिश्च पर्वाणि तदूर्ध्वं[2] तेजसावृतम् ।
तस्माद्द्वादश पर्वाणि वायुव्याप्तिरुदाहृता ॥ ८ ॥

---

१ तन्त्रालो. पूर्वषट्कमिति पाठः । २ तन्त्रालो. ततोर्द्धमिति पाठः ।

आकाशान्तं परं शान्तं सर्वेषां व्यापकं स्मरेत् ।
शक्त्यादिपञ्चखण्डाध्वविधिष्वप्येवमिष्यते ॥ ९ ॥
त्रिखण्डे कण्ठपर्यन्तमात्मतत्त्वमुदाहृतम् ।
विद्यातत्त्वमतोर्ध्वं तु शिवतत्त्वं तु पूर्ववत् ॥ १० ॥
एवं तत्त्वविधिः प्रोक्तो भुवनाध्वा तथोच्यते ।
कालाग्नेर्वीरभद्रान्तं पुरषोडशकं ततः ॥ ११ ॥

गुल्फान्तं विन्यसेद्ध्यात्वा यथावदनुपूर्वशः ।
तस्मादेकाङ्गुलव्याप्त्या लकुलीशादितः क्रमात् ॥१२॥
विन्यसेत्तु द्विरण्डान्तं त्र्यङ्गुलं छगलाण्डकम् ।
ततः पादाङ्गुलव्याप्त्या देवयोगाष्टकं पृथक् ॥ १३ ॥
ततोऽप्यर्धाङ्गुलव्याप्त्या पुरषट्कमनुक्रमात् ।
चतुष्कं तु द्वयेऽन्यस्मिन्नेकमेकत्र चिन्तयन् ॥ १४ ॥

उत्तरादिक्रमाद्द्व्येकभेदो विद्यादिके त्रये ।
काले प्रत्येकमुद्दिष्टमेकैकं तु यथाक्रमम् ॥ १५ ॥
मण्डलाधिपतीनां तु व्याप्तिरर्धाङ्गुला मता ।
त्रिभागन्यूनपर्वाख्या त्रितयस्य तथोपरि ॥ १६ ॥
द्वितीयस्य तु संपूर्णा पञ्चकं समुदाहृतम् ।
अष्टकं पञ्चकं चान्यदेवमेव विलक्षयेत् ॥ १७ ॥

भुवनाध्वविधावत्र पूर्ववच्चिन्तयेच्छिवम् ।
पदानि द्विविधान्यत्र वर्गविद्याविभेदतः ॥ १८ ॥
तेषां तन्मन्त्रवद्व्याप्तिर्यथेदानीं तथा शृणु ।
चतुरङ्गुलमाद्यं तु द्वे चान्येऽष्टाङ्गुले पृथक् ॥ १९ ॥
दशाङ्गुलानि त्रीण्यस्मादेकं[1] पञ्चदशाङ्गुलम् ।
चतुर्भिरधिकैरन्यन्नवमं व्यापकं महत् ॥ २० ॥
ऊनविंशतिके भेदे पदानां व्याप्तिरुच्यते ।
एकैकं त्र्यङ्गुलं ज्ञेयं ततः पूर्वं पदत्रयम् ॥ २१ ॥
सप्ताङ्गुलानि[2] चत्वारि दशाङ्गुलमतः परम् ।
त्र्यङ्गुल द्वे पदे चान्ये षडङ्गुलमतः परम् ॥ २२ ॥
द्वादशाङ्गुलमन्यच्च द्वेऽन्ये पञ्चाङ्गुले पृथक् ।
पदद्वयं चतुष्पर्व द्वे पूर्वे द्वे पृथक्ततः ॥ २३ ॥
व्यापकं पदमन्यच्च........तत्परिकीर्तितम् ।
अपरोऽयं विधिः प्रोक्तः परापरमतः शृणु ॥ २४ ॥
पूर्ववत्पृथिवीतत्त्वं विज्ञेयं चतुरङ्गुलम् ।
सार्धत्र्यङ्गुलमानानि धिषणान्तानि लक्षयेत् ॥ २५ ॥
प्रधानं त्र्यङ्गुलं ज्ञेयं शेषं पूर्ववदादिशेत् ।
परेऽपि पूर्ववत्पृथ्वी त्र्यङ्गुलान्यपराणि च ॥ २६ ॥

---

१ क० पु० एवं पञ्चदशेति पाठः । २ तन्त्रालो. अष्टाङ्गुलानीति पाठः ।

चतुष्पर्वं[1] प्रधानं च शेषं पूर्ववदाश्रयेत् ।
द्विविधोऽपि[2] हि वर्णानां षड्विधो भेद उच्यते[3] ॥ २७ ॥
तत्त्वमार्गविधानेन ज्ञातव्यः परमार्थतः ।
पदमन्त्रकलादीनां पूर्वसूत्रानुसारतः ॥२८॥
त्रितयत्वं प्रकुर्वीत तत्त्ववर्णोक्तवर्त्मना ।
इत्थं भूतशरीरस्य गुरुणा शिवमूर्तिना ॥ २९ ॥
प्रकर्तव्या विधानेन दीक्षा सर्वफलप्रदा ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे देहमार्गाधिकारः षष्ठः ॥ ६ ॥

---

१ क० पु० चतुष्पथेति पाठः । २ क० पु० द्विविधेऽपीति पाठः ।
३ क० पु० इष्यत इति पाठः ।

अथ

सप्तमोऽधिकारः ।

अथातः संप्रवक्ष्यामि मुद्राख्याः शिवशक्तयः ।
याभिः संरक्षितो मन्त्री मन्त्रसिद्धिमवाप्नुयात् ॥ १ ॥
त्रिशूलं च तथा पद्मं शक्तिश्चक्रं सवज्रकम् ।
दण्डदंष्ट्रे महाप्रेता महामुद्रा खगेश्वरी ॥ २ ॥
महोदया कराला च खट्वाङ्गं सकपालकम् ।
हलं पाशाङ्कुशं घण्टा मुद्गरस्त्रिशिखोऽपरः ॥ ३ ॥
आवाहस्थापनीरोधा द्रव्यदा नतिरेव च ।
अमिता योगमुद्रेति विज्ञेया वीरवन्दिते ॥ ४ ॥
तर्जनीमध्यमानामा दक्षिणस्य प्रसारिताः ।
कनिष्ठाङ्गुष्ठकाक्रान्तास्त्रिशूलं परिकीर्तितम् ॥ ५ ॥
पद्माकारौ करौ कृत्वा पद्ममुद्रां प्रदर्शयेत् ।
संमुखौ प्रसृतौ कृत्वा करावन्तरिताङ्गुली ॥ ६ ॥
प्रसृते मध्यमे लग्ने कौमार्याः शक्तिरिष्यते ।
उत्तानवामसुष्टेस्तु दक्ष..................॥७॥
........क्षयेन्मुष्टिं चक्रं नाराचं...............
उत्तानवामकस्योर्ध्वं न्यसेद्दक्षमधोमुखम् ॥८॥

---

१ स्वच्छ. याभिस्तु राक्षित इति पाठः ।

कनिष्ठाङ्गुष्ठकौ श्लिष्टौ शेषाः स्युर्मणिबन्धगाः ।
वज्रमुद्रेति विख्याता चैन्द्री संतोषकारिका ॥ ९ ॥
ऊर्ध्वप्रसारितो मुष्टिर्दक्षिणोऽङ्गुष्ठगर्भगः ।
दण्डमुद्रेति विख्याता वैवस्वतकुलप्रिया ॥ १० ॥
वामतो वक्रगां कुर्याद्वाममुष्टेः कनिष्ठिकाम् ।
दंष्ट्रेयं कीर्तिता देवि चामुण्डाकुलनन्दिनी ॥ ११ ॥
वामजानुगतं पादं हस्तौ पृष्ठप्रलम्बिनौ ।
विकृते लोचने ग्रीवा भग्ना जिह्वा प्रसारिता ॥ १२ ॥
सर्वयोगिगणस्येष्टा प्रीता योगीश्वरी मता ।
हस्तावधोमुखौ पद्भ्यां हृदयान्तं नयेद्बुधः ॥ १३ ॥
तिर्यग्मुखान्तमुपरि संमुखावूर्ध्वगौ नयेत् ।
महामुद्रेति विख्याता देहशोधनकर्मणि ॥ १४ ॥
सर्वकर्मकरी चैषा योगिनां योगसिद्धये ।
बद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत्[1] ॥ १५ ॥
दण्डाकारं तु तं[2] भावं नयेद्यावत्कखत्रयम् ।
निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु ॥ १६ ॥
एतां बद्ध्वा महावीरः खेगतिं प्रतिपद्यते ।
अधोमुखस्य दक्षस्य वाममुत्तानमूर्ध्वतः ॥ १७ ॥

१ तं. क्षिपेदिति पाठः । २ ख० पु० तं. च, तं तावदिति पाठः ।

अनामामध्यमे तस्य वामाङ्गुष्ठेन पीडयेत् ।
तर्जन्या तत्कनिष्ठां च तर्जनीं च कनिष्ठया ॥ १८ ॥
मध्यमानामिकाभ्यां च तदङ्गुष्ठं निपीडयेत् ।
मुद्रा महोदयाख्येयं महोदयकरी नृणाम् ॥ १९ ॥
अनामिकाकनिष्ठाभ्यां सृक्कण्यौ प्रविदारयेत् ।
जितां च चालयेन्मन्त्री हाहाकारं च कारयेत् ॥ २० ॥
क्रुद्धदृष्टिः करालेयं मुद्रा दुष्टभयङ्करी ।
वामस्कन्धगतो वाममुष्टिरुच्छ्रिततर्जनी ॥ २१ ॥
खट्वाङ्गाख्या स्मृता मुद्रा कपालमधुना शृणु ।
निम्नं पाणितलं दक्षमीषत्संकुचिताङ्गुलि[2] ॥ २२ ॥
कपालमिति विज्ञेयमधुना हलमुच्यते ।
मुष्टिवद्धस्य दक्षस्य-तर्जनी वाममुष्टिना ॥ २३ ॥
वक्रतर्जनिना ग्रस्ता हलमुद्रेति कीर्तिता ।
मुष्ट्या [पृष्ठ] गयोर्दक्षवामयोस्तर्जनीद्वयम् ॥ २४ ॥
वामाङ्गुष्ठाग्रसंलग्नं पाशः प्रसृतकुञ्चितः ।
हले मुष्टिर्यथा वामो दक्षहीनस्तथाङ्कुशः ॥ २५ ॥
अधोमुखस्थिते वामे दक्षिणां तर्जनीं बुधः ।
चालयेन्मध्यदेशस्थां घण्टामुद्रा प्रिया मता ॥ २६ ॥

---

१ क० पु० जिह्वां च लालयेदिति पाठः ।
२ ख० मीषत्तत्कुञ्चिताङ्गुलिम् इति पाठः ।

करावूर्ध्वमुखौ कार्यावन्योन्यान्तरिताङ्गुली ।
अनामे मध्यपृष्ठस्थे तर्जन्यौ मूलपर्वगे[1] ॥ २७ ॥

मध्यमे[2] द्वे युते कार्ये कनिष्ठे परुपावधि ।
तर्जन्यौ मध्यपार्श्वस्थे विरले परिकल्पिते ॥ २८ ॥

मुद्गरस्त्रिशिखो[3] ह्येप क्षणादावेशकारकः ।
कराभ्यामञ्जलिं कृत्वा अनामामूलपर्वगौ ॥ २९ ॥

अङ्गुष्ठौ कल्पयेद्विद्वान्मन्त्रावाहनकर्मणि ।
मुष्टी द्वावुन्नताङ्गुष्ठौ स्थापनी परिकीर्तिता ॥ ३० ॥

द्वावेव गर्भगाङ्गुष्ठौ विज्ञेया संनिरोधिनी ।
द्वन्यदा तु समाख्याता.......त्र संमुखी ॥ ३१ ॥

हृदये संमुखौ हस्तौ संलग्नौ प्रसृताङ्गुली ।
नमस्कृतिरियं मुद्रा मन्त्रवन्दनकर्मणि ॥ ३२ ॥

अन्योन्यान्तरिताः सर्वाः करयोरङ्गुलीः स्थिताः ।
कनिष्ठां दक्षिणां वामेऽनामिकाग्रे नियोजयेत् ॥ ३३ ॥

दक्षिणे च तथा वामां तर्जनीमध्यमे तथा ।
अङ्गुष्ठौ मध्यमूलस्थौ मुद्रेयममृतप्रभा ॥ ३४ ॥

---

१ ख० मूलपर्वत इति पाठः । २ ख० मध्ये द्व तु युत इति, परुपावपि इति च पाठः । ३ क० पु० त्रिशिर इति पाठः ।

दक्षिणं नाभिमूले तु वामस्योपरि संस्थितम् ।
तर्जन्यङ्गुष्ठकौ लग्नौ उच्छ्रितौ योगकर्मणि ॥ ३५ ॥

एवं मुद्रागणं मन्त्री बध्नीयाद्धृदये बुधः ।
सर्वासां वाचकश्चासां ओं ह्रीं नाम ततो नमः ॥३६॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे मुद्राधिकारः सप्तमः ॥ ७ ॥

अथ

अष्टमोऽधिकारः ।

अथातः संप्रवक्ष्यामि यजनं सर्वकामदम् ।
यस्य दर्शनमात्रेण योगिनीसंमतो भवेत् ॥ १ ॥
तत्रादौ यागसदनं शुभक्षेत्रे मनोरमम् ।
कारयेदग्निकुण्डेन वर्तुलेन समन्वितम् ॥ २ ॥
पञ्चविंशतिपर्वेण समन्तादर्धनाभिना ।
तुर्यांशमेखलेनापि पर्वौष्ठेन सुशोभिना ॥ ३ ॥
ततः स्नात्वा जितद्वन्द्वो भावस्नानेन मन्त्रवित् ।
तच्च षड्विधमुद्दिष्टं भस्मस्नानाद्यनुक्रमात् ॥ ४ ॥
भस्मस्नानं महास्त्रेण भस्म सप्ताभिमन्त्रितम् ।
मलस्नानाय संहारक्रमेणोद्धूलयेत्तनुम् ॥ ५ ॥
विद्याङ्गैः पञ्चभिः पश्चाच्छिरःप्रभृति गुण्ठयेत् ।
अभिषेकं तु कुर्वीत मूलेनैव षडङ्गिना ॥६॥
ततोऽवासाः सुवासा वा हस्तौ पादौ च धावयेत् ।
आचम्य मार्जनं कुर्याद्विद्यया भूरिवर्णया ॥७॥
न्यासं कृत्वा तु सामान्यमघमर्षं द्वितीयया ।
उपस्थानं च मालिन्या जपेच्चैकाक्षरां पराम् ॥८॥

---

१ क० पु० जलेनैवेति पाठः ।

जलस्नानेऽपि चास्त्रेण मृदं सप्ताभिमन्त्रिताम् ।
पूर्ववत्तनुमालभ्य मलस्नानं समाचरेत् ॥ ९ ॥

विधिस्नानादिकं चात्र पूर्ववत् किंतु वारिणा ।
साधारणविधिस्नातो विद्यात्रितयमन्त्रितम् ॥ १० ॥

तोयं विनिक्षिपेन्मूर्ध्नि मन्त्रस्नानाय मन्त्रवित् ।
रजसा गोधुतेनैव वायव्यं स्नानमाचरेत् ॥ ११ ॥

महास्त्रमुच्चरन् गच्छेद्ध्यानयुक् पदसप्तकम् ।
तदेव पुनरागच्छेदनुस्मृत्य परापराम् ॥ १२ ॥

वर्षातपसमायोगाद्दिव्योऽप्येवंविधो मतः ।
किंतु तत्र परां मन्त्री स्रवन्तीममृतं स्मरेत् ॥ १३ ॥

अस्त्रेणाङ्गुष्ठमूलात्तु वह्निमुत्थाप्य निर्दहेत् ।
स्वतनुं प्लावयेत्पश्चात्परयैवामृतेन तु ॥ १४ ॥

सूर्यादौ मन्त्रमादाय गच्छेदस्त्रमनुस्मरन् ।
यागवेश्मास्त्रसंशुद्धं विशेच्छुचिरनाकुलः ॥१५॥

तत्र द्वारपतीन् पूज्य महास्त्रेणाभिमन्त्रितम् ।
पुष्पं विनिक्षिपेद्ध्यात्वा ज्वलद्विघ्नप्रशान्तये ॥ १६ ॥

दशस्वपि ततोऽस्त्रेण दिक्षु संकल्प्य रक्षणम् ।
प्रविशेद्यागसदनं वह्निवद्वह्निसंयुतम् ॥ १७ ॥

---

१ तं० लो० कृतेति पाठः ।

पूर्वास्यः सौम्यवक्त्रो वा विशेषन्यासमारभेत् ।
तत्रादावस्त्रमन्त्रेण कालानलसमत्विषा ॥ १८ ॥
अङ्गुष्ठाग्रात्तनुं दग्धां सबाह्याभ्यन्तरां स्मरेत् ।
विकीर्यमाणं तद्भस्म ध्यात्वा कवचवायुना ॥ १९ ॥
शिवबिन्दुसमाकारमात्मानमनुचिन्तयेत् ।
ततोऽस्य योजयेच्छक्तिं सोऽहमित्यपराजितः ॥ २० ॥
विद्यामूर्तिं ततो दध्यान्मन्त्रेणानेन शाङ्करि ।
दण्डाक्रान्तं महाप्राणं दण्डारूढं सनाभिकम् ॥ २१ ॥
नितम्बं तदधस्ताच्च वामस्तनमधः पुनः ।
कण्ठं च वामशिखरं वाममुद्राविभूषितम् ॥ २२ ॥
बिन्द्वर्धचन्द्रखं नादशक्तिबिन्दुविभूषितम् ।
एष पिण्डवरो देवि नवात्मक इति श्रुतः ॥ २३ ॥
सर्वसिद्धिकरश्चायं सरहस्यमुदाहृतः ।
एष त्र्यर्णोज्झितोऽधस्ताद्दीर्घैः षड्भिः स्वरैर्युतः ॥ २४ ॥
षडङ्गानि हृदादीनि जातिभेदेन कल्पयेत् ।
क्षयरवलबीजैश्च दीप्तैर्बिन्दुविभूषितैः ॥ २५ ॥
वक्त्राणि कल्पयेत्पूर्वमूर्ध्ववक्त्रादितः क्रमात् ।
प्रत्यङ्गविधिसिद्ध्यर्थं ललाटादिष्वथो न्यसेत् ॥ २६ ॥

१ क० पु० समन्विता इति पाठः ।

अ ललाटे द्वितीयं च वक्त्रे संपरिकल्पयेत् ।
इई नेत्रद्वये दत्त्वा उऊ कर्णद्वये न्यसेत् ॥ २७ ॥

ऋ ॠ नासापुटे तद्वत् ऌ ॡ गण्डद्वये तथा ।
ए ऐ अधोर्ध्वदन्तेषु ओऔकारौ तथोष्ठयोः ॥ २८ ॥

अं शिखायां विसर्गेण जिह्वां संपरिकल्पयेत् ।
दक्षिणस्कन्धदोर्दण्डकराङ्गुलिनखेषु च ॥ २९ ॥

कवर्गं विन्यसेद्वामे तद्वच्चाद्यमनुक्रमात् ।
टताद्यौ पूर्ववद्वर्गौ नितम्बोर्वादिषु न्यसेत् ॥ ३० ॥

पाद्यं पार्श्वद्वये पृष्ठे जठरे हृद्यनुक्रमात् ।
त्वगसृङ्मांससूत्रेषु यवर्गं परिकल्पयेत् ॥ ३१ ॥

शाद्यमस्थिवसाशुक्रप्राणकूपेषु पञ्चकम् ।
मूर्त्यङ्गानि ततो दत्त्वा शिवमावाहयेद्बुधः ॥ ३२ ॥

प्राणोपरि न्यसेन्नाभिं तदूर्ध्वे दक्षिणाङ्गुलिम् ।
वामकर्णप्रमेयोतः सर्वसिद्धिप्रदः शिवः ॥ ३३ ॥

सद्भावः परमो ह्येष भैरवस्य महात्मनः ।
अङ्गान्यनेन कार्याणि पूर्ववत्स्वरभेदतः ॥ ३४ ॥

मूर्तिः सृष्टिस्त्रितत्त्वं च अष्टौ मूर्त्यङ्गसंयुताः ।
शिवः साङ्गश्च षोढैव न्यासः संपरिकीर्तितः ॥ ३५ ॥

अस्योपरि ततः शाक्तं कुर्यान्न्यासं यथा शृणु ।
मूर्तौ परापरां न्यस्य तद्वक्त्राणि च मालिनीम् ॥३६॥
परादित्रितयं पश्चाच्छिखाहृत्पादगं न्यसेत् ।
कवक्त्रकण्ठहृन्नाभिगुह्योरूपादगं क्रमात् ॥३७॥

अघोर्याद्यष्टकं न्यस्य विद्याङ्गानि तु पूर्ववत् ।
ततस्त्वावाहयेच्छक्तिं सर्वयोगिनमस्कृताम् ॥ ३८ ॥

जीवः प्राणपुटान्तस्थः कालानलसमद्युतिः ।
अतिदीप्तस्तु वामाङ्घ्रिभूषितो मूर्ध्नि विन्दुना ॥३९॥

दक्षजानुयुतश्चायं सर्वमातृगणान्वितः ।
अनेन प्रीणिताः सर्वा ददते वाञ्छितं फलम् ॥४०॥

सद्भावः परमो ह्येष मातॄणां परिपठ्यते ।
तस्मादेनां जपेन्मन्त्री य इच्छेत्सिद्धिमुत्तमाम् ॥४१॥

रुद्रशक्तिसमावेशो नित्यमत्र प्रतिष्ठितः ।
यस्मादेषा पराशक्तिर्भेदेनान्येन कीर्तिता ॥ ४२ ॥

यावत्यः सिद्धयस्तन्त्रे सर्वाः स्युरनया कृताः ।
अङ्गानि कल्पयेदस्याः पूर्ववत्स्वरभेदतः ॥ ४३ ॥

---

१ तं० लो० अर्चित इति पाठः । २ तं० लो० अन्येनेति पाठः ।
३ ख० पु० ताः सर्वाः कुरुते त्वियमिति पाठः ।

मूर्तिः सवक्त्रा शक्तिश्च विद्यात्रितय एव च ।
अघोर्याद्यष्टकं चेति तथा विद्याङ्गपञ्चकम् ॥ ४४ ॥

साङ्गा चैव परा शक्तिर्न्यासः प्रोक्तोऽथ षड्विधः ।
यामलोऽयमतो न्यासः सर्वसिद्धिप्रसिद्धये ॥ ४५ ॥

वामो वायं विधिः कार्यो मुक्तिमार्गावलम्बिभिः ।
वर्णमन्त्रविभेदेन पृथग्वा तत्फलार्थिभिः ॥ ४६ ॥

यावन्तः कीर्तिता भेदैः शंभुशक्त्यणुवाचकाः ।
तावत्स्वप्येवमेवायं न्यासः पञ्चविधो मतः ॥ ४७ ॥

किंतु वाह्यस्तु यो यत्र स तत्राङ्गसमन्वितः ।
षष्ठः स्यादिति सर्वत्र षोढैवायमुदाहृतः ॥ ४८ ॥

स्वानुष्ठानाविरोधेन भावाभावविकल्पनैः ।
यागद्रव्याणि सर्वाणि कार्याणि विधिवद्बुधैः ॥४९॥

ततोऽर्घपात्रमादाय भावाभावाविकल्पितम् ।
ततश्चाल्लाग्निसंदग्धं शक्त्यम्बुप्लावितं शुचि ॥ ५० ॥

कर्तव्या यस्य संशुद्धिरन्यस्याप्यत्र वस्तुनः ।
तस्यानेनैव मार्गेण प्रकर्तव्या विजानता ॥ ५१ ॥

१ क० पु० अन्यथाप्यत्रेति पाठः ।

न चासंशोधितं वस्तु किंचिदप्यत्र[1] कल्पयेत् ।
तेन[2] शुद्धं तु सर्वं यदशुद्धमपि तच्छुचि ॥ ५२ ॥

तदम्बुना समापूर्य पड्भिरङ्गैः[3] समर्च्य च ।
अमृतीकृत्य सर्वाणि तेन द्रव्याणि शोधयेत् ॥५३॥

आत्मानं पूजयित्वा तु कुर्यादन्तःकृतिं यथा ।
तथा ते कथयिष्यामि सर्वयोगिगणार्चिते ॥ ५४ ॥

आदावाधारशक्तिं तु नाभ्यधश्चतुरङ्गुलाम् ।
धरां सुरोदं पोतं च कन्दश्चेति चतुष्टयम् ॥ ५५ ॥

एकैकाङ्गुलमेतत्[4]स्याच्छूलस्यामलसारकम् ।
ततो नालमनन्ताख्यं दण्डमस्य प्रकल्पयेत् ॥ ५६ ॥

लम्बिकावधितश्चात्र शूलोर्ध्वं ग्रन्थिरिष्यते ।
अभित्त्वैनं महादेवि पाशजालमहार्णवम् ॥ ५७ ॥

न स योगमवाप्नोति शिवेन सह मानवः ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम् ॥ ५८ ॥

कोणेषु चिन्तयेन्मन्त्री आग्नेयादिष्वनुक्रमात् ।
गात्रकाणां चतुष्कं च दिक्षु पूर्वादिषु स्मरेत् ॥ ५९ ॥

---

१ तं. किंचिदप्युपकल्पयेदिति पाठः । २ क० पु० संशोधितं च यत्सर्वमिति पाठः । ३ क० पु० षड्भिरर्घैरिति पाठः । ४ क० पु० चतुरङ्गुलमेतदिति पाठः ।

ग्रन्थेरूर्ध्वं त्रिशूलाधो भवितव्या चतुष्किका ।
विद्यातत्त्वं तदेवाहुश्छदनत्रयसंयुतम् ॥ ६० ॥

कखलम्बिकयोर्मध्ये तत्तत्त्वमनुचिन्तयेत् ।
पद्माकृति कखतत्त्वमैश्वरं चिन्तयेद्बुधः ॥ ६१ ॥

कर्णिकाकेसरोपेतं सवीजं विकसत्सितम् ।
पूर्वपत्रादितः पश्चाद्वामादिनवकं न्यसेत् ॥ ६२ ॥

वामा ज्येष्ठा च रौद्री च काली चेति तथा परा ।
कलविकरणी चैव बलविकरणी तथा ॥ ६३ ॥

बलप्रमथनी चान्या सर्वभूतदमन्यपि ।
मनोन्मनी च मध्येऽपि भानुमार्गेण विन्यसेत् ॥६४॥

विश्वादिनवकं चान्यद्विलोमात्परिकल्पयेत् ।
विभुर्ज्ञानी क्रिया चेच्छा वागीशी ज्वालिनी तथा ६५

वामा ज्येष्ठा च रौद्री च सर्वाः कालानलप्रभाः ।
ब्रह्मविष्णुहराः पूर्वं ये शाक्ताः प्रतिपादिताः ॥६६॥

---

१ ख० पु० छदनद्वयेति पाठः । २ क० पु० कखलम्बकयोर्मध्ये तत्त्वमनुविचिन्तयेदित्येयंविधः पाठः । ३ क० पु० कृति कखे तत्त्वमिति, ४ चिन्तयेत्तत इति च पाठः । ५ क० पु० वीजं विकसितं सितमिति पाठः । ६ क० ततः परा इति पाठः ।

दलकेसरमध्यस्था मण्डलानां त ईश्वराः ।
ध्वनि ? चार्केन्दुवह्नीनां संज्ञया परिभावयेत् ॥६७॥

ईश्वरं च महाप्रेतं प्रहसन्तं सचेतनम् ।
कालाग्निकोटिवपुपमित्येवं सर्वमासनम् ॥ ६८ ॥

तस्य नाभ्युत्थितं शक्तिशूलशृङ्गत्रयं स्मरेत् ।
करवत्रयेण निर्यातं द्वादशान्तावसानकम् ॥ ६९ ॥

चिन्तयेत्तस्य शृङ्गेपु शाक्तं पद्मत्रयं ततः ।
सर्वाधिष्ठायकं शुक्लमित्येतत्परमासनम् ॥ ७० ॥

तत्रोपरि ततो मूर्तिं विद्याख्यामनुचिन्तयेत् ।
आत्माख्यां च ततस्तस्यां पूर्वन्यासं शिवात्मकम् ७१

ततो मध्ये परां शक्तिं दक्षिणोत्तरयोर्द्वयम् ।
परापरां स्वरूपेण रक्तवर्णां महाबलाम् ॥ ७२ ॥

इच्छारूपधरां ध्यात्वा किंचिदुग्रां न भीपणाम् ।
अपरां वामशृङ्गे तु भीपणां कृष्णपिङ्गलाम् ॥ ७३ ॥

इच्छारूपधरां देवीं प्रणतार्तिविनाशिनीम् ।
परां चाप्यायनीं देवीं चन्द्रकोटययुतप्रभाम् ॥ ७४ ॥

---

१ परात्रि, इत्येतत्सर्वमिति पाठः ।

षड्विधेऽपि कृते शाक्ते मूर्त्यादावपि चिन्तयेत् ।
विद्याङ्गपञ्चकं पश्चादाग्नेय्यादिषु विन्यसेत् ॥ ७५ ॥

अग्नीशरक्षोवायूनां दक्षिणे च यथाक्रमम् ।
शक्त्यङ्गानि शिवाङ्गानि तथैव विधिना स्मरेत् ॥७६॥

किंतु शक्रादिदिक्ष्वस्त्रमन्त्रं मध्ये च लोचनम् ।
अघोराद्यष्टकं ध्यायेदघोर्याद्यष्टकान्वितम् ॥ ७७ ॥

सर्वासामावृतत्वेन लोकपालांश्च बाह्यतः ।
साश्रान्स्वमन्त्रैः संचिन्त्य जपं पश्चात्समारभेत् ॥७८॥

स्वरूपे तल्लयो भूत्वा एकैकां दशधा स्मरेत् ।
ज्वलत्पावकसंकाशां ध्यात्वा स्वाहान्तमुच्चरेत् ॥७९॥

सकृदेकैकशो मन्त्री होमकर्मप्रसिद्धये ।
इत्येव मानसो यागः कथितः सामुदायिकः ॥८०॥

एतत्त्रिशूलमुद्दिष्टमेकदण्डं त्रिशक्तिकम् ।
इत्थमेतदविज्ञाय शक्तिशूलं वरानने ॥ ८१ ॥

बद्धापि खेचरीं मुद्रां नोत्पतत्यवनीतलात् ।
इत्येतच्छास्त्रभवं प्रोक्तमष्टान्तं शाक्तमिष्यते ॥ ८२ ॥

तुर्यान्तमाणवं विद्यादिति शूलत्रयं मतम् ।
पृथग्यागविधानेन शक्तिचक्रं विचिन्तयेत् ॥ ८३ ॥

---

१ ख० पु० शक्तिपद्ममिति पाठः ।

तेनापि खेचरीं बद्ध्वा त्यजत्येवं महीतलम् ।
ततोऽभिमन्त्र्य धान्यानि महास्त्रेण त्रिसप्तधा ॥८४॥

निक्षिपेद्दिक्षु सर्वासु ज्वलत्पावकवत्स्मरेत् ।
निर्विघ्नं तद्गृहं ध्यात्वा संहृत्येशदिशं नयेत् ॥ ८५ ॥

पञ्चगव्यं ततः कुर्याद्वदनैः पञ्चभिर्बुधः ।
गोमूत्रं गोमयं चैव क्षीरं दधि घृतं तथा ॥ ८६ ॥

मन्त्रयेदूर्ध्वपर्यन्तैः षडङ्गेन कुशोदकम् ।
मुद्रे द्रव्यामृतं बद्ध्वा तत्त्वं तस्य विचिन्तयेत् ॥८७॥

तेन संप्रोक्षयेद्भूमिं स्वल्पेनान्यन्निधापयेत्[1] ।
वास्तुयागं ततः कुर्यान्मालिन्युच्चारयोगतः ॥ ८८ ॥

पुष्पैरञ्जलिमापूर्य फकारादि[2] समुच्चरन् ।
ध्यात्वा शक्त्यन्तमध्वानं नकारान्ते विनिक्षिपेत्॥८९॥

गन्धधूपादिकं दत्त्वा गणेशानं प्रपूजयेत् ।
षड्त्थमासनं न्यस्य प्रणवेन ततोपरि ॥ ९० ॥

गामित्यनेन विघ्नेशं गन्धधूपादिभिर्यजेत्[3] ।
अस्याङ्गानि[4] गकारेण षड्दीर्घस्वरयोगतः ॥ ९१ ॥

---

१ क० पु० नान्यद्विदारयेदिति पाठः । २ क० पु० हकारादीति पाठः ।
३ क० पु० गन्धपुष्पादिभिरिति पाठः । ४ तं० तस्याङ्गानीति पाठः ।

त्रिनेत्रमुदितं ध्यात्वा गजास्यं वामनाकृतिम् ।
विसर्ज्य सिद्धिकामस्तु महास्त्रमनुपूजयेत् ॥ ९२ ॥
दत्त्वानन्तं तथा धर्मं ज्ञानं वैराग्यमेव च ।
ऐश्वर्यं कर्णिकां चेति षड्युत्थमिदमासनम् ॥ ९३ ॥
अस्योपरि न्यसेद्ध्यात्वा खड्गखेटकधारिणम् ।
विकरालं महादंष्ट्रं महोग्रं भ्रुकुटीमुखम् ॥ ९४ ॥
स्वाङ्गषट्कसमोपेतं दिङ्मातृपरिवारितम् ।
स्वार्णैरेवाङ्गषट्कं तु फट्कारपरिदीपितम् ॥ ९५ ॥
तद्रूपमेव संचिन्त्य ततो मातृष्टकं यजेत् ।
इन्द्राणीं पूर्वपत्रे तु सवज्रां युगपत्स्मरेत् ॥ ९६ ॥
आग्नेयीं शक्तिहस्तां च याम्यां दण्डकरां ततः ।
नैर्ऋतीं वारुणानीं च वायवीं च विचक्षणः ॥ ९७ ॥
खड्गपाशध्वजैर्युक्तां चिन्तयेद्युगपत्प्रिये ।
कौवेरीं मुद्गरकरामीशानीं शूलसंयुताम् ॥ ९८ ॥
गन्धपुष्पादिभिः पूज्य स्वतन्त्रे होममाचरेत् ।
आदौ च कलशं कुर्यात्सहस्राधिकमन्त्रितम् ॥ ९९ ॥
सहस्रं होमयेत्तत्र ततो जप्त्वा विसर्जयेत् ।
शतमष्टोत्तरं पूर्णं पश्चाद्यजनमारभेत् ॥ १०० ॥

---

१ क० पु० कर्णिकायां चेति पाठः । २ क० ख पु० साङ्गैः (सार्णैः) इत्येवंविधः पाठः ।

तत्रादौ कुम्भमादाय हेमादिमयमव्रणम् ।
सर्वमन्त्रौ[1]षधीगर्भं गन्धाम्बुपरिपूरितम् ॥ १०१ ॥
चूतपल्लववक्त्रं च स्रक्सूत्रसि[2]तकण्ठकम् ।
रक्षोघ्नतिलकाक्रान्तं सितवस्त्रयुगावृतम् ॥ १०२ ॥
शताष्टोत्तरसंजप्तं मू[3]लमन्त्रप्रपूजितम् ।
वार्धान्यापि तथाभूता किंतु सास्त्रेण पूजिता ॥१०३॥
विकिरैरासनं दत्त्वा पूर्वोक्तं तु विचक्षणः ।
इन्द्रादीन्पूजयेत्पश्चात्स्वदिक्षु प्रोक्तसस्वरैः ॥ १०४ ॥
अविच्छिन्नां ततो धारां वार्धान्या प्रतिपादयेत् ।
भ्रामयेत्कलशं पश्चाद्ब्रूयाल्लोकेश्वरानिदम् ॥ १०५ ॥
भो भोः शक्र त्वया स्वस्यां दिशि वि[4]घ्नप्रशान्तये ।
सावधानेन कर्मान्तं भवितव्यं शिवाज्ञया ॥ १०६ ॥
नीत्वा तत्रासने पूर्वं मूर्ति[5]भूतं घटं न्यसेत् ।
तस्य दक्षिणदिग्भागे वार्धानीं वि[6]निवेशयेत् ॥ १०७ ॥
आत्ममूर्त्यादिपूज्यान्तं कुम्भे विन्यस्य मन्त्रवित् ।
गन्धपुष्पादिभिः पूज्य वार्धान्यां पू[7]जयेदिमम् ॥ १०८ ॥

---

१ तं० सर्वरत्नौषधीगर्भमिति पाठः । २ तं० कृतकण्ठकमिति पाठः । ३ क० पु० मूलमन्त्रप्रपूरितमिति पाठः । ४ क० पु० विघ्नोपशान्तये इति पाठः । ५ क० पु० मूर्तिभूतां परामिति पाठः । ६ तं० विनिवेदयेदिति पाठः । ७ ख० पु० पूजयेद्वाचिमिति पाठः ।

गन्धैर्मण्डलकं कृत्वा ब्रह्मस्थाने विचक्षणः ।
तत्र संपूजयेत्षट्कं त्रिकं वाप्येकमेव वा ॥ १०९ ॥

कुण्डस्योल्लेखनं लेखः कुट्टनं चोपलेपनम् ।
चतुष्पथाक्षवाटं च वज्रसंस्थापनं तथा ॥ ११० ॥

कुशास्तरणपरिधिविष्टराणां च कल्पनम् ।
सर्वमस्त्रेण कुर्वीत विद्यामोंह्रीमिति न्यसेत् ॥ १११ ॥

शिवमोमिति विन्यस्य संपूज्य द्वितयं पुनः ।
ताम्रपात्रे शरावे वा आनयेज्जातवेदसम् ॥ ११२ ॥

शिवशुक्रमिति ध्यात्वा विद्यायोनौ विनिक्षिपेत् ।
ततस्त्वाहुतयः पञ्च विद्याङ्गैरेव होमयेत् ॥ ११३ ॥

जननादि ततः कर्म सर्वमेवंकृते कृतम् ।
परापरामनुस्मृत्य दद्यात्पूर्णाहुतिं पुनः ॥ ११४ ॥

संपूज्य मातरं वह्नेः पितरं च विसर्जयेत् ।
चर्वादिसाधनायाग्निं समुद्धृत्य ततः पुनः ॥ ११५ ॥

ज्वलितस्याथवा वह्नेश्चितिं वामेन वायुना ।
आकृष्य हृदि संकुम्भ्य दक्षिणेन पुनः क्षिपेत् ॥ ११६ ॥

---

१ तं० गन्धमण्डलकामिति, ख० पु० मनुमण्डलकमिति पाठः । २ ख० पु० संपूजयेच्छंखमिति, ३ तं० त्रिके वेति पाठः । ४ ख० पु० विद्यामैन्द्रीमिति पाठः । ५ तं० मेवं कृतं कृतमिति पाठः ।

पूर्णां च पूर्ववद्दद्याच्छिवाग्नेरपरो विधिः ।
शिवरूपं तमालोक्य तस्यात्मान्तःकृतिः क्रमात् ११७

कुर्यादन्तःकृतिं मन्त्री ततो होमं समारभेत् ।
मूलं शतेन संतर्प्य तदङ्गानि षडङ्गतः ॥ ११८॥

शेषाणां मन्त्रजातीनां दशांशेनैव तर्पणम् ।
ततः प्रवेशयेच्छिष्याञ्शुचीन्स्नातानुपोषितान् ॥११९॥

प्रणम्य देवदेवेशं चतुष्टयगतं क्रमात् ।
पञ्चगव्यं चरुं दद्याद्दन्तधावनमेव च ॥ १२० ॥

हृदयेन चरोः सिद्धिर्याज्ञिकैः क्षीरतण्डुलैः ।
संपातं सप्तभिर्मन्त्रैस्ततः पञ्चागभाजितम् ॥ १२१ ॥

शिवाग्निगुरुशिष्याणां वार्धानीकुम्भयोः समम् ।
दन्तकाष्ठं ततो दद्यात्क्षीरवृक्षसमुद्भवम् ॥ १२२ ॥

तस्य पातः शुभः प्राचीसौम्यैशाप्योर्ध्वदिग्गतः ।
अशुभोऽन्यत्र तत्रापि होमोऽष्टशातिको भवेत् ॥१२३॥

बहिःकर्म ततः कुर्याद्दिक्षु सर्वासु दैशिकः ।
ओं क्षः क्षः सर्वभूतेभ्यः स्वाहेति मनुनामुना ॥१२४॥

---

१ क० पु० दशांशेश्चैव तर्पणमिति पाठः । २ क० पु० शिष्यांश्चेति पाठः ।

समाचम्य कृतन्यासः समभ्यर्च्य च शङ्करम् ।
..............................गृहे शुचिः ॥१२५॥
न्यासं कृत्वा तु शिष्याणामात्मनश्च विशेषतः ।
प्रभाते नित्यकर्मादि कृत्वा स्वप्नं विचारयेत् ॥१२६॥
शुभं प्रकाशयेत्तेषामशुभे होममाचरेत् ।
ततः पुष्पफलादीनां सुवेशाभरणाः स्त्रियः ॥ १२७॥
आपदुत्तरणं चैव शुभदेशावरोहणम् ।
मद्यपानं शिरश्छेदमाममांसस्य भक्षणम् ॥ १२८॥
देवतादर्शनं साक्षात्तथा विष्ठानुलेपनम् ।
एवंविधं शुभं दृष्ट्वा सिद्धिं प्राप्नोत्यभीप्सिताम्॥१२९
एतदेवान्यथाभूतं दुःस्वप्न इति कीर्त्यते ।
पक्वमांसाशनाभ्यङ्गगर्तादिपतनादिकम् ॥ १३० ॥
तत्रोक्तां निष्कृतिं कृत्वा द्विजत्वापादनं ततः ।
देवाग्निगुरुदेवीनां पूजां कृत्वा सदा बुधः ॥ १३१ ॥
एतेषामनिवेद्यैव न किंचिदपि भक्षयेत् ।
देवद्रव्यं गुरुद्रव्यं चण्डीद्रव्यं च वर्जयेत् ॥ १३२ ॥
निष्फलं नैव चेष्टेत मुहूर्तमपि मन्त्रवित् ।
योगाभ्यासरतो भूयान्मन्त्राभ्यासरतोऽपि वा॥१३३॥

---

१ क० पु० दुःस्वप्नमितीति पाठः ।

इत्येवमादिसमयाञ्श्रावयित्वा विसर्जयेत् ।
देवदेवं ततः स्नानं शिष्याणामात्मनोऽपि वा ॥१३४॥

कारयेच्छिवकुम्भेन सर्वदुष्कृतहारिणा ।
इत्येतत्सामयं कर्म समासात्परिकीर्तितम् ॥ १३५॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे समयाधिकारोऽष्टमः ॥ ८ ॥

अथ

नवमोऽधिकारः ।

अथैषां समयस्थानां कुर्याद्दीक्षां यदा गुरुः ।
तथाधिवासनं कृत्वा...................... ॥ १ ॥

स च पूर्वां दिशं सम्यक् सूत्रमास्फालयेत्ततः ।
तन्मध्यात्पूर्ववारुण्यावङ्कयेत समान्तरम् ॥ २ ॥

पूर्वापरसमासेन सूत्रेणोत्तरदक्षिणम् ।
अङ्कयेदपरादङ्कात्पूर्वादपि तथैव ते ॥ ३ ॥

मत्स्यमध्ये क्षिपेत्सूत्रमायतं दक्षिणोत्तरे ।
मत्क्षेत्रार्धमानेन मध्याद्दिक्ष्वङ्कयेत्समम् ॥ ४ ॥

तद्वद्दिक्स्थाच्च कोणेषु अनुलोमविलोमतः ।
पातयेत्तेषु सूत्राणि चतुरश्रप्रसिद्धये ॥ ५ ॥

वेदाश्रिते हि हस्ते प्राक् पूर्वमर्धं विभाजयेत् ।
हस्तार्धं सर्वतस्त्यक्त्वा पूर्वोदग्यामदिग्गतम् ॥ ६ ॥

गुणाङ्गुलसमैर्भागैः शेषमस्य विभाजयेत् ।
त्र्यङ्गुलैः कोष्ठकैरूर्ध्वैस्तिर्यक् चाष्टद्विधात्मकैः ॥ ७ ॥

---

१ क० पु० ददेत्सूत्रमिति पाठः । २ क० पु० वेदाश्रिते त्रिहस्ते इति, ख० पु० एवमस्य त्रिहस्तस्य प्राक् इति पाठान्तरं च ।

द्वौ द्वौ भागौ परित्यज्य पुनर्दक्षिणसौम्यगौ ।
ब्रह्मणः पार्श्वयोर्जीवाच्चतुर्थात्पूर्वतस्तथा ॥ ८ ॥

भागार्धभागमानं तु खण्डचन्द्रद्वयं द्वयम् ।
तयोरन्तस्तृतीये तु दक्षिणोत्तरपार्श्वयोः ॥ ९ ॥

जीवे खण्डेन्दुयुगलं कुर्यादन्तर्भ्रमाद्बुधः ।
तयोरपरमर्मस्थं खण्डेन्दुद्वयकोटिगम् ॥ १० ॥

बहिर्मुखभ्रमं[1] कुर्यात् खण्डचन्द्रद्वयं द्वयम् ।
तद्वद्ब्रह्मणि कुर्वीत भागभागार्धसंमितम्[2] ॥ ११ ॥

ततो द्वितीयभागान्ते ब्रह्मणः पार्श्वयोर्द्वयोः ।
द्वे रेखे पूर्वगे नेये भागत्र्यंशशमे बुधैः ॥ १२ ॥

एकार्धेन्दूर्ध्वकोटिस्थं[3] ब्रह्मसूत्राग्रसंगतम् ।
सूत्रद्वयं प्रकुर्वीत मध्यशृङ्गप्रसिद्धये ॥ १३ ॥

तदग्रपार्श्वयोर्जीवात्सूत्रमेकान्तरे श्रितम्[4] ।
आदिद्वितीयखण्डेन्दुकोणात्कोणान्तमाश्रयेत् ॥ १४ ॥

तयोरेवापराज्जीवात्प्रथमार्धेन्दुकोणतः ।
तद्वदेव नयेत्सूत्रं शृङ्गद्वितयसिद्धये ॥ १५ ॥

---

१ क० पु० मुखं भ्रममिति पाठः । २ क० पु० भागं भागार्धेति पाठः ।
३ क० पु० एकार्धेन्द्वर्धेति पाठः । ४ ख० पु० वृतमिति पाठः ।

क्षेत्रार्धे चापरे दण्डो द्विकरच्छन्नपञ्चकः ।
[1]द्विकरं पञ्च तद्भागाः पञ्चपीठतिरोहिताः ॥ १६ ॥
शेषमन्यद्भवेद्दृश्यं पृथुत्वाद्भागसंमितम् ।
पद्मिस्तृतं चतुर्दीर्घं तदधोऽमलसारकम् ॥ १७ ॥
वेदाङ्गुलं च तदधो मूलं तीक्ष्णाग्रमिष्यते ।
आदिक्षेत्रस्य कुर्वीत दिक्षु द्वारचतुष्टयम् ॥ १८ ॥
हस्तायामं तदर्धं तु विस्तारादपि तत्समम् ।
[2]द्विगुणं बाह्यतः कुर्यात्ततः पद्मं यथा शृणु ॥ १९ ॥
एकैकभागमानानि कुर्याद्वृत्तानि वेदवत् ।
दिक्ष्वष्टौ पुनरप्यष्टौ जीवसूत्राणि षोडश ॥ २० ॥
द्वयोर्द्वयोः पुनर्मध्ये तत्संख्यातानि पातयेत् ।
[3]एषां तृतीयवृत्तस्थं पार्श्वजीवसमं [4]भ्रमम् ॥ २१ ॥
एतदन्तं प्रकुर्वीत ततो जीवाग्रमानयेत् ।
यत्रैव कुत्रचित्सङ्गस्तत्संबन्धे स्थिरीकृते ॥ २२ ॥
तत्र कृत्वा नयेन्मर्त्रीं पत्राग्राणां प्रसिद्धये ।
एकैकस्मिन्दले कुर्यात्केसराणां त्रयं त्रयम् ॥ २३ ॥

---

१ ख० पु० चापरे कुर्याद्दण्डमस्य यथा शृणु, इति पाठान्तरं वर्तते ।
२ ग० पु० द्विगुणं बाह्यमर्धं चेति पाठः । ३ ग० पु० एषु तृतीयेति पाठः । ४ क० पु० भ्रमादिति पाठः ।

द्विगुणाष्टाङ्गुलं[1] कार्यं तद्वच्छृङ्गकजत्रयम् ।
ततः प्रपूजयेन्मन्त्री रजोभिः सितपूरकैः ॥ २४ ॥

रक्तैः कृष्णैस्तथा पीतैर्हरितैश्च विशेषतः ।
कर्णिका पीतवर्णेन मूलमध्याग्रदेशतः[2] ॥ २५ ॥

सितं रक्तं तथा पीतं कार्यं केसरजालकम् ।
दलानि शुक्लवर्णानि प्रतिवारणया सह ॥ २६ ॥

पीतं तद्वच्चतुष्कोणं कर्णिकार्धसमं[3] वहिः ।
सितरक्तपीतकृष्णैस्तत्पादान्वाह्नितः क्रमात् ॥ २७ ॥

चतुर्भिरपि शृङ्गाणि त्रिभिर्मण्डलमिष्यते ।
दण्डः स्यान्नीलरक्तेन पीतमामलसारकम् ॥ २८ ॥

रक्तं शूलं प्रकुर्वीत यत्तत्पूर्वं प्रकल्पितम् ।
पश्चाद्द्वारस्य पूर्वेण त्यक्त्वाङ्गुलचतुष्टयम् ॥ २९ ॥

द्वारं वेदाश्रि वृत्तं वा संकीर्णं वा विचित्रितम् ।
एकद्वित्रिपुरं तुल्यं सासुद्रमथ वोभयम् ॥ ३० ॥

कपालकण्ठशोभोपशोभादिवहुचित्रितम् ।
विचित्राकारसंस्थानं वल्लीसूक्ष्मगृहान्वितम् ॥ ३१ ॥

---

१ क० पु० द्विगुणाष्टदलमिति पाठः । २ क० पु० मध्याग्रभेदत इति पाठः । ३ ग० पु० कर्णिकारसममिति पाठः ।

एवमत्र सुनिष्पन्ने गन्धवस्त्रेण मार्जनम् ।
कृत्वा स्नानं प्रकुर्वीत पूर्वोक्तेनैव कर्मणा[1] ॥ ३२ ॥

प्रविश्य पूर्ववन्मन्त्री उपविश्य यथा पुरा ।
न्यस्य पूर्वोदितं सर्वं पञ्चधा भैरवात्मकम् ॥ ३३ ॥

उत्तरे विन्यसेच्छृङ्गे देवदेवं नवात्मकम् ।
मध्ये भैरवसद्भावं दक्षिणे रतिशेखरम् ॥ ३४ ॥

रक्तात्वङ्गांससूत्रैस्तु वामकर्णविभूषितम् ।
विन्दुयुक्तं प्रमेयोतं रतिशेखरमादिशेत् ॥ ३५ ॥

शाक्तं च पूर्ववत्कृत्वा तर्पयेत्पूर्ववद्बुधः ।
पुनरभ्यर्च्य देवेशं भक्त्या विज्ञापयेदिदम् ॥ ३६ ॥

गुरुत्वेन त्वयैवाहमाज्ञातः परमेश्वर ।
अनुग्राह्यास्त्वया शिष्याः शिवशक्तिप्रचोदिताः ॥ ३७ ॥

तदेते[2] तद्विधाः प्राप्तास्त्वमेषां कुर्वनुग्रहम् ।
मदीयां तनुमाविश्य येनाहं त्वत्समो भवन् ॥ ३८ ॥

करोम्येवमिति प्रोक्तो हर्षादुत्फुल्ललोचनः ।
ततः षड्विधमध्वानमनेनाधिष्ठितं स्मरेत् ॥ ३९ ॥

---

१ ग० पु० वर्मणेति पाठः ।

२ क० पु० तदेतद्विविधा इति पाठः ।

सृष्ट्यादिपञ्चकर्माणि निष्पाद्यान्यस्य चिन्तयेत् ।
शक्तिभिर्जीवमूर्तिः स्याद्विधैवास्य परापरा ॥ ४० ॥

मूर्तामूर्तत्वभेदेन मामप्येपानुतिष्ठति ।
करणत्वं प्रयान्त्यस्य मन्त्रा ये हृदयादयः ॥ ४१ ॥

एवंभूतं शिवं ध्यात्वा तद्गतेनान्तरात्मना ।
भाव्यं तन्मयमात्मानं दशधावर्तयेच्छिवम् ॥ ४२ ॥

त्रिःकृत्वा सर्वमन्त्रांश्च गर्भावरणसंस्थितान् ।
सितोष्णीषं ततो बद्ध्वा सप्तजप्तं नवात्मना ॥ ४३ ॥

शिवहस्तं ततः कुर्यात्पाशविश्लेपकारकम् ।
प्रक्षाल्य गन्धतोयेन हस्तं हस्तेन केनचित् ॥ ४४ ॥

गन्धादिग्धो यजेद्देवं साङ्गमासनवर्जितम् ।
आत्मन्यालभनं कुर्याद्ग्रहणं योजनं तथा ॥ ४५ ॥

वियोगं च तथोद्धारं पाशच्छेदादिकं च यत् ।
एवं पतित्वमासाद्य प्रपञ्चव्यापितः शिवम् ॥ ४६ ॥

भावयेत्पृथगात्मानं तत्समानगुणं ततः ।
मण्डलस्थोऽहमेवायं साक्षीवाखिलकर्मसु ॥ ४७ ॥

---

१ ख० पु० निष्पाद्यानानीति पाठः ।

२ क० पु० मूर्त्यमूर्तत्वभेदेन ममाप्येपा इति पाठः ।

होमाधिकरणत्वेन वह्नावहमवस्थितः ।
आयागान्तमहं कुम्भे संस्थितो विघ्नशान्तये ॥ ४८ ॥

शिष्यदेहे च तत्पाशविश्लेषत्वप्रसिद्धये ।
साक्षात्स्वदेहसंस्थोऽहं कर्तानुग्रहकर्मणः ॥ ४९ ॥

इत्येतत्सर्वमालोच्य शोध्याध्वानं[1] विचिन्तयेत् ।
दीक्षां येनाध्वना मन्त्री शिष्याणां कर्तुमिच्छति ॥५०॥

तत्रैवालोचयेत्सर्वं यायात्पदमनामयम् ।
तत्र तेनापृथग्भूत्वा पुनः संचिन्तयेदिदम् ॥ ५१ ॥

अहमेव परं तत्त्वं मयि सर्वमिदं जगत् ।
अधिष्ठाता च कर्ता च सर्वस्याहमवस्थितः ॥ ५२ ॥

तत्समत्वं गतो जन्तुर्मुक्त इत्यभिधीयते ।
एवं संचिन्त्य भूयोऽपि शोध्यमाद्यं समाश्रयेत् ॥५३॥

शिष्यमण्डलवह्नीनां तत्रैकं भावयेत्स्थितम् ।
शोध्याध्वानं तु शिष्याणां न्यस्य देहे पुरोक्तवत् ॥५४॥

स्वेन स्वेनैव मन्त्रेण स्वव्याप्तिध्यानमाश्रयेत् ।
आगन्तु सहजं शाक्तं बद्धादौ पाशपञ्जरम् ॥ ५५ ॥

---

१ ग० पु० शोध्यातमानमिति पाठः ।

बाहुकण्ठशिखाग्रेषु त्रिषु (वृत्) त्रिगुणतन्तुना ।
स्वमन्त्रेण ततस्तत्त्वमावाह्येष्ट्वा प्रतर्प्य च । ५६ ॥

ततस्तच्छोध्ययोनीनां व्यापिनीं योनिमानयेत् ।
मायान्तेऽध्वनि तामेव शुद्धे विद्यां विचक्षणः ॥५७॥

तस्यां संतर्पणं कृत्वा शिष्यमस्त्रेण ताडयेत् ।
आलभ्य हृदये विद्वाञ्छिवहस्तेन तं पुनः ॥ ५८ ॥

ग्रहणं तस्य कुर्वीत रश्मिमात्राावियोगतः ।
नाडीमार्गेण गत्वा तु हंहन्मन्त्रपुटीकृतम् ॥ ५९ ॥

कृत्वात्मस्थं ततो योनौ गर्भाधानं विचिन्तयेत् ।
त्र्यर्णार्धाक्षरया मन्त्री सर्वगर्भक्रियान्वितम् ॥ ६० ॥

भोग्यभोक्तृत्वसामर्थ्यनिष्पत्त्या जननं बुधः ।
दक्षशृङ्गस्थया मन्त्री प्रकुर्वीत सुलोचने ॥ ६१ ॥

पिङ्गनीपूर्विकाभिश्च अस्त्राद्यैः परयापि च ।
सम्यगाहुतयो दद्याद्दश पञ्च विचक्षणः ॥ ६२ ॥

ततोऽस्यापरया कार्यं पाशविच्छेदनं बुधैः ।
भुवनेशमथामन्त्र्य तत्त्वेश्वरमथापि वा ॥ ६३ ॥

---

१ क० पु० आवाह्याप्य प्रतर्प्येति पाठः ।
२ क० पु० त्र्यर्णाधार्धाक्षरामिति, क्रियान्वितामिति च पाठः ।

भोगभागा..........पश्चात्तमिदमादिशेत्।
भुवनेश त्वया नास्य साधकस्य शिवाज्ञया ॥ ६४ ॥

प्रतिबन्धः प्रकर्तव्यो यातुः पदमनामयम्।
उत्क्षेपणं ततः कुर्यात्तयैवाध्युष्टवर्णया ॥ ६५ ॥

अन्याप्तिमन्त्रसंयोगात्पृथङ् मार्गविशुद्धये।
दद्यादेकैकशो ध्यात्वा आहुतीनां त्रयं त्रयम् ॥ ६६ ॥

ततः पूर्णाहुतिं दद्यात्परया वौषडन्तया।
शिशुमुत्क्षिप्य चात्मस्थं तद्देहस्थं च कारयेत् ॥ ६७ ॥

आहुतीनां त्रयं दद्याद्दत्त्वा पूर्णाहुतिं बुधः।
महापाशुपतास्त्रेण विलोमादिविशुद्धये ॥ ६८ ॥

विसर्जयित्वा वागीशीं तत्त्वं तु तदनन्तरम्।
विलीनं भावयेच्छुद्धमशुद्धे परमेश्वरि ॥ ६९ ॥

कालान्तव्याप्तिसंशुद्धौ कृतायामेवमादरात्।
बाहुपाशं तु तं छित्त्वा होमयेदाज्यसंयुतम् ॥ ७० ॥

मायातत्त्वे विशुद्धे तु कण्ठपाशे तथा बुधः।
मायान्तमार्गसंशुद्धौ दीक्षाकर्मणि सर्वतः ॥ ७१ ॥

---

१ ग० पु० वहुपाशमिति पाठः।

क्रियास्वनुक्तमन्त्रासु योजयेदपरां बुधः ।
विद्यादिसकलान्ते च तद्वदेव परापराम् ॥ ७२ ॥
योजयेन्नैश्वरादूर्ध्वं पिवन्यादिकमष्टकम् ।
न चापि सकलादूर्ध्वमङ्गपट्कं विचक्षणः ॥ ७३ ॥
निष्कले परया कार्यं यत्किंचिद्विधिचोदितम् ।
विशुद्धे सकलान्ते तु शिखां छित्त्वा विचक्षणः ॥ ७४ ॥
हुत्वा चाज्यं ततः शिष्यं स्नापयेदनुपूर्वतः ।
आचम्याभ्यर्च्य देवेशं स्रुवमापूर्य सर्पिषा ॥ ७५ ॥
कृत्वा शिष्यं तथात्मस्थं मूलमन्त्रमनुस्मरेत् ।
शिवशक्तिं तथात्मानं शिष्यं सर्पिस्तथानलम् ॥ ७६ ॥
एकीकुर्वञ्छनैर्गच्छेद्द्वादशान्तमनन्यधीः ।
तत्र कुम्भकमास्थाय ध्यायन्सकलनिष्कलम् ॥ ७७ ॥
तिष्ठेत्तावदनुद्विग्नो यावदाज्यक्षयो भवेत् ।
एवं युक्तः परे तत्त्वे गुरुणा शिवमूर्तिना ॥ ७८ ॥
न भूयः पशुतामेति दग्धमायानिबन्धनः ।
विधिरेप समाख्यातो दीक्षाकर्मणि भौवने ॥ ७९ ॥

---

१ क० पु० योजयेच्चैश्वरादिति पाठः ।

२ क० पु० अष्टधेति पाठः ।

इतराध्वविधिं मुक्त्वा शिवयोगविधिं तथा ।
विलोमकर्म संत्यज्य द्विगुणस्तत्त्ववर्त्मनि ॥ ८० ॥

तद्वच्च वर्णमार्गेऽपि चतुर्धा पदवर्त्मनि ।
अष्टधा मन्त्रमार्गेऽपि कलाख्येऽपि च तद्द्विधा ॥ ८१ ॥

त्रिखण्डे विंशतिगुणः स एव परिकीर्तितः ।
इति सर्वाध्वसंशुद्धिः समासात्परिकीर्तिता ॥ ८२ ॥

साधकाचार्ययोः कर्म कथ्यमानमतः शृणु ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे क्रियादीक्षाधिकारो नवमोऽधिकारः ॥

अथ

दशमोऽधिकारः

अथ लक्षणसंपन्नं सिद्धिसाधनतत्परम् ।
शास्त्रज्ञं संयतं धीरमलुब्धमशठं दृढम् ॥ १ ॥
अपरीक्ष्य गुरुस्तद्वत्साधकत्वे नियोजयेत् ।
समभ्यर्च्य विधानेन पूर्ववत्परमेश्वरम् ॥ २ ॥
द्वितीये पूर्ववत्कुम्भं हेमादिमयमव्रणम् ।
सर्वत्र मध्यपद्मस्य दक्षिणं दलमाश्रितम् ॥ ३ ॥
नायकानां पृथङ्मन्त्रान्पूजयेत्कुसुमादिभिः ।
तं संतर्प्य सहस्रेण प्रकुर्यादभिषेचनम् ॥ ४ ॥
भद्रपीठे शुभे स्थाप्य श्रीपर्णे दारुनिर्मिते ।
पूर्वामुखमुदग्वक्त्रं स्नातं पुष्पाद्यलङ्कृतम् ॥ ५ ॥
कृतमन्त्रतनुः सम्यक् सम्यक्क कृतमङ्गलः ।
शङ्खभेर्यादिनिर्घोषैर्वेदमङ्गलनिस्वनैः ॥ ६ ॥
सर्वराजोपचारेण कृत्वा तस्याभिषेचनम् ।
सदाशिवसमं ध्यात्वा ततस्तमपि भूषयेत् ॥ ७ ॥
पुनः संपूज्य देवेशं मन्त्रमस्मै ददेद्बुधः ।
पुष्पाक्षततिलोपेतः सजल....श्वरं न्यसेत् ॥ ८ ॥

सोऽपि मूर्धनि तं तद्वन्मूर्तिमाश्रित्य दक्षिणाम् ।
अभिषिच्य ततोऽस्त्रेण रुद्रशक्तिं प्रकाशयेत् ॥ ९ ॥

स तयालिङ्ग्य तन्मन्त्रं सहस्रेण प्रतर्पयेत् ।
तदा प्रभृति तन्निष्ठस्तत्समानगुणो भवेत् ॥ १० ॥

आचार्यस्याभिषेकोऽयं स........मन्त्रविधिं विना ।
किंतु तस्य........अधिवासपदान्वितम् ॥ ११ ॥

एवमेतत्पदं प्राप्यं दुष्प्राप्यमकृतात्मनाम् ।
साधको मन्त्रसिद्ध्यर्थं मन्त्रव्रतमुपाचरेत् ॥ १२ ॥

एवं कृत्वाभिषेकोक्तं स्नात्वा विद्याधिपं जपेत् ।
लक्षमेकं द[शांशेन त]स्य तर्पणमाचरेत् ॥ १३ ॥

पूर्ववच्चाभिषेकं च कृत्वा ब्रह्मशिरो जपेत् ।
तल्लक्ष्यस्तन्मयो भूत्वा लक्षद्वयमतन्द्रितः ॥ १४ ॥

लक्षद्वयं च रुद्राणीं चतुष्कं तु पुरुष्टुतम् ।
लक्षाणां पञ्चकं देवि महापाशुपतं जपेत् ॥ १५ ॥

सितरक्तपीतकृष्णविचित्राम्बरभूषणः ।
ततः संरक्षितो मन्त्रैरेभिरप्रतिमो भवेत् ॥ १६ ॥

अवाच्यः सर्वदुष्टानां मन्त्रतेजोपबृंहितः ।
एवं चीर्णव्रतो भूत्वा यं साधयितुमिच्छति ॥ १७ ॥

दत्त्वार्घं तस्य लक्षाणां जपेन्नवकमादरात् ।
उत्तमद्रव्यहोमाच्च तद्दशांशेन तर्पणम् ॥ १८ ॥

महाक्ष्मापपलान्याहुरुत्तमादीनि तद्विदः ।
मध्यमे द्विगुणं कृत्वा त्रिगुणं कन्यसेऽपि च ॥ १९ ॥

आज्यगुग्गुलनृस्नेहा महामांससमाः मताः ।
दधिबिल्वपयःपद्माः क्ष्मासमाः परिकीर्तिताः ॥२०॥

धात्रीदूर्वामृतामीनाः सम्यगाज्यसमा मताः ।
तिलाद्यैरथ कुर्वीत नवपड्गुणं क्रमात् ॥ २१ ॥

पूर्वमेवमिमं कृत्वा सिद्धेरर्घं ददेद्बुधः ।
दत्त्वार्घं तु जपेत्तावद्यावत्सिद्धिरभीप्सिता ॥ २२ ॥

लक्षेणैकेन पृथ्वीशः सभृत्यबलवाहनः ।
वशमानीयते देवि द्वाभ्यां राज्यमवाप्नुयात् ॥ २३ ॥

त्रिभिर्निधानसंसिद्धिश्चतुर्भिर्बलसिद्धयः ।
पञ्चभिर्मेदिनी सर्वा षड्भिरप्सरसां गणः ॥ २४ ॥

सप्तभिः सप्त लोकाश्च दशभिस्तत्समो भवेत् ।
पञ्चाशद्भिस्ततो गच्छेदव्यक्तान्तं महेश्वरि ॥ २५ ॥

---

१ ग० पु० पूर्वसेवामिमामिति पाठः ।

मायान्तं षष्टिभिर्लक्षैरीश्वरान्तमशीतिभिः ।
सकलावनिपर्यन्तं कोटिजप्तस्य सिद्ध्यति ॥ २६ ॥

अथवा वीरचित्तः स्यात्कृत्वा सेवां यथोदिताम् ।
कृष्णभूतदिने रात्रौ विधिमेनं समाचरेत् ॥ २७ ॥

कृत्वा पूर्वोदितं यागं हुत्वा द्रव्यमथोत्तरम् ।
ऊर्ध्वकायो जपेन्मन्त्री सुनिष्कम्पोत्तरामुखः ॥ २८ ॥

तावद्यावत्समायाता[1] योगेश्वर्यः समन्ततः ।
कृत्वा कलकलारावमतिघोरं सुदारुणम् ॥ २९ ॥

भूमौ निपत्य तिष्ठन्ति वेष्टयान्तः साधकेश्वरम् ।
तासां कृत्वा नमस्कारं भित्त्वा वामाङ्गमात्मनः ॥३०॥

तदुत्थेन ततस्तासां दत्त्वार्घं तत्समो भवेत् ।
आचार्योऽपि च षण्मासं मौनी प्रतिदिनं चरेत्[2] ॥३१॥

दश पञ्च च ये मन्त्राः पूर्वमुक्ता मया तव ।
पूर्वन्यासेन संनद्धस्त्रिकालं वह्निकार्यकृत् ॥ ३२ ॥

ध्यायेत्पूर्वोदितं शूलं ब्रह्मचर्यं समाश्रितः ।
कृत्वा पूर्वोदितं यागं त्रिशक्तिपरिमण्डलम् ॥ ३३ ॥

---

१ क० पु० समाख्याता इति पाठः ।

२ ग० पु० प्रतिदिनं जपेदिति पाठः ।

अभिषिञ्चेत्तदात्मानमादावन्ते च दैशिकः ।
एवं चीर्णव्रतो भूत्वा मन्त्री मन्त्रविदुत्तमः ॥ ३४ ॥

निग्रहानुग्रहं कर्म कुर्वन्न प्रतिहन्यते[1] ।
शुद्धयोर्विन्यसेन्मूलमध्यादित्रितये त्रयम् ॥ ३५ ॥

वामाङ्गुष्ठे तले नेत्रे तर्जन्यामस्त्रमेव च ।
अक्षह्रीमिति[2] खण्डेन शब्दराशिं निवेशयेत् ॥ ३६ ॥

नफह्रीमित्यनेनापि शक्तिमूर्तिं विचक्षणः ।
विपरीतमहामुद्राप्रयोगान्मूलमेव च ॥ ३७ ॥
स्वस्थानेषु तथाङ्गानि न्यासः सामान्य इत्ययम् ।

इति श्रीमालिनीविजयोत्तरे तन्त्रेऽभिषेकाधिकारो दशमः ॥ १० ॥

१ क० पु० प्रतिपश्यतीति पाठः । २ ख० पु० नमो ह्रीमिति पाठः ।

अथ

एकादशोऽधिकारः

अथातः संप्रवक्ष्यामि दीक्षां परमदुर्लभाम् ।
भुक्तिमुक्तिकरीं सम्यक्सद्यःप्रत्ययकारिकाम् ॥ १ ॥

नास्यां मण्डलकुण्डादि किंचिदप्युपयुज्यते ।
न च न्यासादिकं पूर्वं स्नानादि च यथेच्छया ॥२॥

प्रविश्य यागसदनं सूपलिप्तं सुचर्चितम् ।
प्राङ्मुखोदङ्मुखो वापि सुपुष्पाम्बरभूषितः ॥ ३ ॥

दीप्तां शक्तिमनुस्मृत्य पादाग्रान्मस्तकावधि ।
महामुद्राप्रयोगेन निर्दग्धां चिन्तयेत्तनुम् ॥ ४ ॥

अनुलोमप्रयोगाच्च मालिनीममृतप्रभाम् ।
चिन्तयेत्तनुनिष्पत्त्यै तद्ध्यानगतमानसः ॥ ५ ॥

शोध्याध्वानं ततो देहे पूर्वोक्तमनुचिन्तयेत् ।
ततः संशोध्य वस्तूनि शक्त्यैवामृततां नयेत् ॥ ६ ॥

परासंपुटमध्यस्थां मालिनीं सर्वकर्मसु ।
योजयेत विधानज्ञः परां वा केवलां प्रिये ॥ ७ ॥

गणेशं पूजयित्वा तु पुरा विघ्नप्रशान्तये ।
ततः स्वगुरुमारभ्य पूजयेद्गुरुपद्धतिम् ॥ ८ ॥

गणेशाद्यः ततः सर्वं यजेन्मन्त्रकदम्बकम् ।
तत्पतीनां ततोऽर्ध्वं च तत्रैव परिपूजयेत् ॥ ९ ॥

अन्त्याद्यः पूजयेद्विद्यां तद्वद्विद्यां महेश्वरीम् ।
मन्त्रविद्यागणस्यान्तः कुलशक्तिं निवेशयेत् ॥ १० ॥

पूर्वयाम्यापरोदक्षु माहेश्याद्विचतुष्टयम् ।
इन्द्राणीपूर्वकं तद्वदैशादिदल अन्तगम् ॥ ११ ॥

तत्रोपरि न्यसेद्देवं कूटरूपाणुनामुना ।
जीवं दण्डसमाक्रान्तं शूलस्योपरि संस्थितम् ॥ १२ ॥

दक्षाङ्गुलिं ततोऽधस्तात्ततो वामपयोधरम् ।
नाभिकण्ठौ ततोऽधस्ताद्वामस्कन्धविभूषणौ ॥ १३ ॥

शिवजिह्वान्वितः पश्चात्तदूर्ध्वोष्ठेन चोपरि ।
सर्वयोगिनिचक्राणामधिपोऽयमुदाहृतः ॥ १४ ॥

अस्याप्युच्चारणादेव संवित्तिः स्यात्परोदिता ।
ततो वीराष्टकं पश्चाच्छक्त्युक्तविधिना यजेत् ॥ १५ ॥

प्रभूतैर्विविधैरिष्ट्वा गन्धधूपैः स्रगादिभिः ।
श्रीकारपूर्वकं नाम पादान्तं परिकल्पयेत् ॥ १६ ॥

ततः शिष्यं समाहूय बहुधा सुपरीक्षितम् ।
रुद्रशक्त्या तु संप्रोक्ष्य देवाग्रे विनिवेशयेत् ॥ १७ ॥

---

१ क० पु० शक्त्याक्तेति पाठः ।

भ्रुजौ तस्य समालोक्य रुद्रशक्त्या प्रदीपयेत् ।
तथैवाप्यर्पयेत्पुष्पं करयोर्गन्धदिग्धयोः ॥ १८ ॥

निरालम्बौ तु तौ ध्यात्वा शक्त्याकृष्टौ विचिन्तयेत् ।
शक्तिमन्त्रितनेत्रेण वद्ध्वा नेत्रे तु पूर्ववत् ॥ १९ ॥

ततः प्रक्षेपयेत्पुष्पं सा शक्तिस्तत्करस्थिता ।
[1]यत्र तत्पतते पुष्पं तत्कुलं तस्य लक्षयेत् ॥ २० ॥

[2]मुखमुद्धाट्य तं पश्चात्पादयोः प्रतिपातयेत् ।
ततोऽस्य मस्तके चक्रं हस्तयोश्चार्च्य योगवित् ॥२१॥

तद्धस्तौ प्रेरयेच्छक्त्या यावन्मूर्धान्तमागतौ ।
शिवहस्तविधिः प्रोक्तः सद्यःप्रत्ययकारकः ॥ २२ ॥

चरुकं दापयेत्पश्चात् खर्जूरादिफलोद्भवम् ।
शक्त्यालम्बां तनुं कृत्वा स्थापयेदग्रतः शिशोः ॥२३॥

पुष्पक्षेपप्रयोगेन हस्तमाकृष्य दक्षिणम् ।
चरुकं ग्राहयेन्मन्त्री तद्ध्यानगतमानसः ॥ २४ ॥

शिवहस्तप्रयोगेन समारोप्य मुखं नयेत् ।
अनेनैव विधानेन क्षीरवृक्षसमुद्भवम् ॥ २५ ॥

---

१ क० पु० तत्र तत्पतनेति पाठः ।
२ क० पु० मुखं वद्धा युतं पश्चादिति पाठः ।

दन्तकाष्ठं ददेद्देवि षोडशाङ्गुलमायतम् ।
एतेषां चालनान्मन्त्री शक्तिपातं परीक्षयेत् ॥ २६ ॥

मन्दतीव्रादिभेदेन मन्दतीव्रादिकाद्बुधः ।
इत्ययं समयी प्रोक्तः संस्थितोक्तेन वर्त्मना ॥ २७ ॥

चिकीर्षुश्च यदा दीक्षामस्यैवार्पितमानसः ।
तदिष्ट्वा पूर्ववद्योगी कुलेशं तमनुक्रमात्[1] ॥ २८ ॥

संपूज्य पूर्ववच्छिष्यमृजुदेहे विलोकयेत् ।
शक्तिं संचिन्त्य पादाग्रान्मस्तकान्तं विचक्षणः ॥२९॥

शोध्याध्वानं ततो न्यस्य सर्वाध्वव्याप्तिभावनाम् ।
शक्तितत्त्वादिभेदेन पूर्वोक्तेन च वर्त्मना ॥ ३० ॥

उपविश्य ततस्तस्य विधानमिदमाचरेत् ।
मूलशोध्यात्समारभ्य शक्तिं दीप्तानलप्रभाम् ॥ ३१ ॥

योजयेच्छोध्यसंशुद्धिभावनागतमानसः ।
एवं सर्वाणि शोध्यानि निर्दहन्तीमनामयाम् ॥ ३२ ॥

शिवे संचिन्तयेल्लीनां निष्कले सकलेऽपि वा ।
योगिना योजिता मार्गे स्वजातीयस्य पोषणम् ॥३३॥

---

१ क० पु० सुकुलीनमनुक्रमादिति पाठः ।

कुरुते निर्दहत्यन्यद्भिन्नजातिकदम्बकम् ।
अनया शोध्यमानस्य शिष्यस्यास्य महामतिः ॥ ३४ ॥

लक्षयेच्चिह्नसंघातमानन्दादिकमादरात् ।
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चमी[1] ॥ ३५ ॥

[illegible]ाविष्टया शक्त्या मन्दतीव्रादिभेदतः ।
पाशस्तोभपशुग्राहौ प्रकुर्वीत यथेच्छया ॥ ३६ ॥

गृहीतस्य पुनः कुर्यान्नियोगं शेषभुक्तये ।
अथवा कस्यचिन्नायमावेशः[2] संप्रजायते ॥ ३७ ॥

तदेनं युगपच्छक्त्या सबाह्याभ्यन्तरे[3] दहेत् ।
तया संदह्यमानोऽसौ च्छिन्नमूल इव द्रुमः ॥ ३८ ॥

पतते काश्यपीपृष्ठे आक्षेपं वा करोत्यसौ ।
यस्य स्वेदमपि स्यान्न तं चैवोपलवत्त्यजेत् ॥ ३९ ॥

पृथक्तत्त्वविधौ दीक्षां योग्यतावश्यवर्तिनः ।
तत्त्वाभ्यासविधानेन वक्ष्यमाणेन कारयेत् ॥ ४० ॥

इति संदीक्षितस्यास्य मुमुक्षोः शेषवर्तनम् ।
कुलक्रमेष्टिरादेश्या पञ्चावस्थासमन्विता ॥ ४१ ॥

---

१ क० पु० घूर्णिश्च पञ्चकमिति पाठः । २ क० पु० कस्यचिद्वाय-मिति पाठः । ३ ग० पु० भ्यन्तरं दहेदिति पाठः ।

बुभुक्षोस्तु प्रकुर्वीत सम्यग्योगाभिषेचनम् ।
तत्रेष्ट्वा पूर्ववद्देहं विस्तीर्णैर्विब्रुधैर्बुधैः (?) ॥ ४२ ॥
हेमादिदीपकानष्टौ घृतेनारुणवर्तिकान् ।
कुलाष्टकेन संबोध्य शिवं शक्ते प्रपूजयेत् ॥ ४३ ॥
सर्वरत्नौषधीगर्भे गन्धाम्बुपरिपूरिते ।
तेनाभिषेचयेत्तं तु शिवहस्तोक्तवर्त्मना ॥ ४४ ॥
आचार्यस्याभिषेकोऽयमधिकारपदान्वितः ।
कुर्यात्पिण्डादिभिस्तद्वच्चतुःषष्टिं प्रदीपकान् ॥ ४५ ॥
अभिषिक्तविधावेव सर्वयोगिगणेन तु ।
विदितौ भवतस्तत्र गुरुर्मोक्षप्रदो भवेत् ॥ ४६ ॥
अनयोः कथयेज्ज्ञानं त्रिविधं सर्वमप्यलम् ।
स्वकीयाज्ञां ददेद्योगी स्वक्रियाकरणं प्रति ॥ ४७ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे दीक्षाधिकार एकादशः ॥ ११ ॥

---

१ क० पु० कथयोर्ज्ञानमिति पाठः ।

अथ

द्वादशोऽधिकारः

अथैतां देवदेवस्य श्रुत्वा वाचमतिस्फुटाम् ।
प्रहर्षोत्फुल्लनयना जगदानन्दकारिणी ॥ १ ॥

संतोषामृतसंतृप्ता देवी देवगणार्चिता ।
प्रणम्यान्धकहन्तारं पुनराहेति भारतीम् ॥ २ ॥

पूर्वमेव त्वया प्रोक्तं योगी योगं समभ्यसेत् ।
तस्याभ्यासः कथं कार्यः कथ्यतां त्रिपुरान्तक ॥ ३ ॥

एवमुक्तो जगद्धात्र्या भैरवो भयनाशनः ।
प्राह प्रसन्नगम्भीरां गिरमेतामुदारधीः ॥ ४ ॥

योगाभ्यासविधिं देवि कथ्यमानं मया शृणु ।
स्थिरीभूतेन येनेह योगी सिद्धिमवाप्स्यति ॥ ५ ॥

गुहायां भूगृहे वापि निःशब्दे सुमनोरमे ।
सर्वाबाधाविनिर्मुक्ते योगी योगं समभ्यसेत् ॥ ६ ॥

जितासनो जितमना जितप्राणो जितेन्द्रियः ।
जितनिद्रो जितक्रोधो जितोद्वेगो गतव्यथः ॥ ७ ॥

लक्ष्यभेदेन वा सर्वमथवा चित्तभेदतः ।
धरादिशक्तिपर्यन्तं योगीशस्तु प्रसाधयेत् ॥ ८ ॥

व्योमविग्रहविन्द्वर्णभुवनध्वनिभेदतः ।
लक्ष्य[2]भेदः स्मृतः षोढा यथावदुपदिश्यते ॥ ९ ॥

बाह्याभ्यन्तरभेदेन समुच्चयकृतेन च ।
त्रिविधं कीर्तितं व्योम दशधा विन्दुरिष्यते ॥ १० ॥

कदम्बगोलकाकारः स्फुरत्तारक[3]संनिभः ।
शुक्लादिभेदभेदेन एकोऽपि दशधा मतः ॥ ११ ॥

चिञ्चिनीचीरवाकादिप्रभेदाद्दशधा ध्वनिः ।
विग्रहः स्वाणुभेदाच्च द्विधा भिन्नोऽप्यनेकधा ॥१२॥

भुवनानां न संख्यास्ति वर्णानां सा शतार्धिका ।
एकस्मिन्नपि साध्ये वै लक्षेदत्रानुषङ्गतः ॥ १३ ॥

अन्यान्यपि फलानि स्युर्लक्ष्यभेदः स उच्यते ।
एकमेव फलं यत्र चित्तभेदस्त्वसौ मतः ॥ १४ ॥

होमदीक्षाविशुद्धात्मा समावेशो[4]पदेशवान् ।
यं सिषाधयिषुर्योगमादावेव समाचरेत् ॥ १५ ॥

---

१ ख० भुक्त्वा समादधे इति पाठः । २ क० लक्षभेदो मत इति पाठः । ३ क० पु० तारकसप्रभ इति पाठः । ४ क० पु० समावेशोपदेशवानिति पाठः ।

हस्तयोस्तु पराबीजं न्यस्य शक्तिमनुस्मरेत् ।
महामुद्राप्रयोगेन विपरीतविधौ बुधः ॥ १६ ॥

ज्वलद्वह्निप्रतीकाशं पादाग्रान्मस्तकान्तिकम् ।
नमस्कारं ततः पश्चाद्बद्ध्वा हृदि धृतानिलः ॥ १७ ॥

[illegible]रूपेण पराबीजमतिदीप्तमनुस्मरेत् ।
तस्य मात्रात्रयं ध्यायेत्करखत्रयविनिर्गतम् ॥ १८ ॥

ततस्तालशताद्योगी समावेशमवाप्नुयात् ।
ब्रह्मघ्नोऽपि हि सप्ताहात्प्रतिवासरमभ्यसेत् ॥ १९ ॥

एवमाविष्टदेहस्तु यथोक्तं विधिमाचरेत् ।
यः पुनर्गुरुणैवादौ कृतावेशविधिक्रमः[1] ॥ २० ॥

स वासनानुभावेन भूमिकाजयमारभेत् ।
गणनाथं नमस्कृत्य संस्मृत्य त्रिगुरुक्रमम् ॥ २१ ॥

सम्यगाविष्टदेहः स्यादिति ध्यायेदनन्यधीः ।
स्वदेहं हेमसंकाशं तुर्याश्रं वज्रलाञ्छितम् ॥ २२ ॥

ततो गुरुत्वमायाति सप्तविंशतिभिर्दिनैः ।
दिवसात्सप्तमादूर्ध्वं जडता चास्य जायते ॥ २३ ॥

---

१ क० पु० विधिक्रमात् इति पाठः ।

षड्भिर्मासैर्जितव्याधिर्द्रुतहेमनिभो भवेत् ।
वज्रदेहस्त्रिभिश्चाब्दैर्नवनागपराक्रमः ॥ २४ ॥

एषा ते पार्थिवी शुद्धा धारणा परिकीर्तिता ।
आद्या पूर्वोदिते देवि भेदे पञ्चदशात्मके ॥ २५ ॥

सव्यापारं स्मरेद्देहं द्रुतहेमसमप्रभम् ।
उपविष्टं च तुर्यश्रे मण्डले वज्रभूषिते ॥ २६ ॥

सप्ताहाद्गुरुतामेति मासाद्व्याधिविवर्जितः ।
षड्भिर्मासैर्धरान्तःस्थं सर्वं जानाति तत्त्वतः ॥ २७ ॥

त्रिभिरब्दैर्महीं भुङ्क्ते सप्ताम्भोनिधिमेखलाम् ।
द्वितीयः कथितो भेदस्तृतीयमधुना शृणु ॥ २८ ॥

तद्वदेव स्मरेद्देहं किंतु व्यापारवर्जितम् ।
पूर्वोक्तं फलमाप्नोति तद्वत्पातालसंयुतम् ॥ २९ ॥

चतुर्थे हृद्गतं ध्यायेद्द्वादशाङ्गुलमायतम् ।
पूर्ववर्णस्वरूपेण सव्यापारमतन्द्रितः ॥ ३० ॥

प्राप्य पूर्वोदितं सर्वं पातालाधिपतिर्भवेत् ।
तदेव स्थिरमाप्नोति निर्व्यापारे तु पञ्चमे ॥ ३१ ॥

स्फुरत्सूर्यनिभं पीतं षष्ठे कृष्णं घनावृतम् ।
निस्तरङ्गं स्मरेत्तद्वत्सप्तमेऽपि विचक्षणः ॥ ३२ ॥

द्वयेऽप्यत्र स्थिरीभूते भूर्भुवःस्वरिति त्रयम् ।
वेत्ति भुङ्क्ते च लोकानां पुरोक्तैरेव वत्सरैः ॥ ३३ ॥

सबालं हृदयान्तस्थमात्मानं कनकप्रभम् ।
स्वप्रभाद्योतिताशेषदेहान्तमनुचिन्तयेत् ॥ ३४ ॥

[illegible]धारादिभेदेन सप्तलोकीं तु पूर्ववत् ।
वेत्ति भुङ्क्ते स्थिरीभूते भेदेऽस्मिन्नवमे बुधः ॥ ३५ ॥

रविबिम्बनिभं पीतं पूर्ववाद्वितयं स्मरेत् ।
ब्रह्मलोकमवाप्नोति पूर्वोक्तेनैव वर्त्मना ॥ ३६ ॥

अधः प्रकाशितं पीतं द्विरूपं पूर्ववन्महत् ।
चिन्तयेन्मत्समो भूत्वा मल्लोकमनुगच्छति ॥ ३७ ॥

सबाह्याभ्यन्तरं पीतं तेजः सर्वप्रकाशकम् ।
चिन्तयेच्छतरुद्राणामधिपत्वमवाप्नुयात् ॥ ३८ ॥

इत्येवं पृथिवीतत्त्वमभ्यस्यं दशपञ्चधा ।
योगिभिर्योगसिद्ध्यर्थं तत्फलानां बुभुक्षया ॥ ३९ ॥

योग्यतावशसंजाता यस्य यत्रैव वासना ।
स तत्रैव नियोक्तव्यो दीक्षाकाले विचक्षणैः ॥ ४० ॥

यो यत्र योजितस्तत्त्वे[1] स तस्मान्न निवर्तते ।
तत्फलं सर्वमासाद्य शिवयुक्तोऽपवृज्यते ॥ ४१ ॥

अयुक्तोऽप्यूर्ध्वसंशुद्धिसंप्राप्तभुवनेशतः ।
शुद्धाच्छिवत्वमायाति दग्धसंसारबन्धनः ॥ ४२ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे प्रथमधारणाधिकारो द्वादशः ॥ १२ ॥

---

१ क० पु० वशगा जातेति पाठः ।

अथ

त्रयोदशोऽधिकारः ।

अथातः संप्रवक्ष्यामि धारणां वारुणीमिमाम् ।
यया संसिद्धयोगेन जलान्ताधिपतिर्भवेत् ॥ १ ॥

जलान्तःस्थं स्मरेद्देहं सितं शीतं सुवर्तुलम् ।
सबाह्याभ्यन्तरं योगी नान्यदस्तीति चिन्तयेत् ॥ २ ॥

एवमभ्यस्यतस्तस्य सप्ताहात्क्लिन्नता भवेत् ।
पित्तव्याधिपरित्यक्तो मासेन भवति ध्रुवम् ॥ ३ ॥

स्निग्धाङ्गः स्निग्धदृष्टिश्च नीलकुञ्चितमूर्धजः ।
भवत्यब्देन योगीन्द्रस्त्रिभिर्वर्षति मेघवत् ॥ ४ ॥

इत्येषा वारुणी प्रोक्ता प्रथमा शुद्धधारणा ।
अधुना संप्रवक्ष्यामि भेदैर्भिन्नामिमां पुनः ॥ ५ ॥

पूर्ववच्चिन्तयेद्देहं सव्यापारं सितं स्वकम् ।
जलोपरि स्थितं देवि तद्गतेनान्तरात्मना ॥ ६ ॥

सप्ताहान्मुच्यते रोगैः सर्वैः पित्तसमुद्भवैः ।
षण्मासाज्जायते स्थैर्यं यदि तन्मयतां गतः ॥ ७ ॥

---

१ जलात्मकं स्मरेदिति पाठः स्वच्छन्दे प्रमाणितः ।

जलावरणविज्ञानमन्दैरस्य त्रिभिर्भवेत् ।
निर्व्यापारमभेदेऽपि सर्वत्र वरुणोपमः ॥ ८ ॥

स याति वारुणं तत्त्वं भूमिकां क्रमशोऽभ्यसेत् ।
पूर्ववत्कण्ठमध्यस्थमात्मानं द्वादशाङ्गुलम् ॥ ९ ॥

संस्मरञ्जलतत्त्वेशं प्रपश्यन्नचिराद्ध्रुवम् ।
तद्दृष्टिः स्थिरतामेति स्वरूपे पञ्चमे स्थिरे ॥ १० ॥

द्विभेदेऽपि स्थिरीभूते चन्द्रबिम्बे घनावृते ।
तत्समानत्वमभ्येति ततः सकलरूपिणी ॥ ११ ॥

चिन्त्यते देहमापूर्य सितवर्णेन तेजसा ।
तदेव स्थिरतामेति तत्र सुस्थिरतां गते ॥ १२ ॥

घनमुक्तेन्दुबिम्बाभस्ततः समनुचिन्तयेत् ।
तत्पतित्वं समभ्येति द्वितीयं स्थिरतां व्रजेत् ॥ १३ ॥

अतः प्रकाशकं शुक्लं ततस्तेजो विचिन्तयेत् ।
विद्येश्वरत्वमाप्नोति जलावरणसंभवम् ॥ १४ ॥

स्वदेहव्यापिनि ध्याते तत्रस्थे शुक्लतेजसि ।
सर्वाधिपत्यमाप्नोति सुस्थिरे तत्र सुस्थिरम् ॥ १५ ॥

ध्येयतत्त्वसमानत्वमवस्थात्रितये स्थिरे ।
द्वितीये च तदीशानसंवित्तिरुपजायते ॥ १६ ॥

द्वितीयेऽन्यत्र तत्तुल्यः स्थिरो भवति योगवित् ।
षट्के सर्वेशतामेति द्वितीयेऽन्यत्र तु च्युतिः ॥ १७ ॥

इत्ययं सर्वतत्त्वेषु भेदे पञ्चदशात्मके ।
ज्ञेयो विधिर्विधानज्ञैः फलपञ्चकसिद्धिदः ॥ १८ ॥
तत्फलान्तरमेतस्मादुक्तं यच्चापि वक्ष्यते ।
अनुषङ्गफलं ज्ञेयं तत्सर्वमाविचारतः ॥ १९ ॥
इत्येवं वारुणी प्रोक्ता प्रभेदैर्दशपञ्चभिः ।
योगिनां योगसिद्ध्यर्थमाग्नेयीमधुना शृणु ॥ २० ॥
त्रिकोणं चिन्तयेद्देहं रक्तज्वालावलीधरम् ।
सप्तभिर्दिवसैर्देवि तैक्ष्ण्यमस्योपजायते ॥ २१ ॥
वातश्लेष्मभवैः सर्वैर्मासान्मुच्यति साधकः ।
निद्राहीनश्च बह्वाशी स्वल्पविण्मूत्रकृद्भवेत् ॥ २२ ॥
इच्छया निर्दहत्यन्यत्स्पष्टवस्तु ऋतुक्षयात् ।
त्र्यब्दादग्निसमो भूत्वा क्रीडत्यग्निर्यथेच्छया ॥ २३ ॥
सर्वं निर्दहति क्रुद्धः सशैलवनकाननम् ।
त्रिकोणमण्डलारूढमात्मानमनुचिन्तयेत् ॥ २४ ॥
सव्यापारादिभेदेन सर्वत्रापि विचक्षणः ।
सप्ताहाद्व्याधिभिर्हीनः षण्मासादग्निसाद्भवेत् ॥ २५ ॥
त्रिभिरब्दैः स संपूर्णं तेजस्तत्त्वं प्रपश्यति ।
यच्छक्तिभेदे यद्दृष्टं तत्तद्भेदे स्थिरीभवेत् ॥ २६ ॥

१ ग० पु० अग्निवद्भवेदिति पाठः ।

पूर्ववत्तालुमध्यस्थमात्मानं ज्वलनप्रभम् ।
ध्यायन्प्रपश्यते तेजस्तत्त्वेशानखिलान्क्रमात् ॥ २७ ॥
धूमाक्रान्ताग्निसंकाशं रविविम्बसमाकृतिम् ।
ध्यायंस्तन्मध्यतस्तेजस्तत्त्वेशसमतां व्रजेत् ॥ २८ ॥
प्रभाहततमोजालं विधूमाग्निसमप्रभम् ।
तत्रैव सकलं ध्यायेत्तत्पतित्वमवाप्नुयात् ॥ २९ ॥
दिवसाग्निप्रभाकारं तत्र तेजो विचिन्तयेत् ।
तन्मात्रसंमतामेति[1] तत्र सुस्थिरतां गते ॥ ३० ॥
मणिप्रदीपसंकाशं तेजस्तत्र प्रकाशयेत् ।
मन्त्रेशेशत्वमभ्येति योगी तन्मयतां गतः ॥ ३१ ॥
सबाह्याभ्यन्तरं तेजो ध्यायन्सर्वत्र तद्गतम् ।
तस्मान्न च्यवते स्थानादासंहारमखण्डितः ॥ ३२ ॥
संहारे तु परं शान्तं पदमभ्येति शाङ्करम् ।
इत्येषा पञ्चदशधा कथिता वह्निधारणा ॥ ३३ ॥
स्वदेहं चिन्तयेत्कृष्णं वृत्तं षट्[2]बिन्दुलाञ्छितम् ।
चलं सचूचूशब्दं च वायवीं धारणां श्रितः ॥ ३४ ॥
चलत्वं कफजव्याधिविच्छेदाद्वायुवद्भवेत् ।
षण्मासमभ्यसेद्योगी[3] तद्गतेनान्तरात्मना ॥ ३५ ॥

---

१ ग० पु० तन्मन्त्रसमताभिति पाठः । २ क० पु० वृत्तषट्पञ्चलाञ्छनमिति पाठः । ३ ग० पु० अभ्यसन्योगीति पाठः ।

योजनानां शतं गत्वा मुहूर्तादेत्यखेदतः ।
वत्सरैस्तु त्रिभिः साक्षाद्वायुरूपधरो भवेत् ॥ ३६ ॥
चूर्णयत्यद्रिसंघातं वृक्षानुन्मूलयत्यपि ।
क्रुद्धश्चानयते शक्रं सभृत्यबलवाहनम् ॥ ३७ ॥
नीलाञ्जननिभं देहमात्मीयमनुचिन्तयेत् ।
पूर्वोक्तं सर्वमाप्नोति षण्मासान्नात्र संशयः ॥ ३८ ॥
ऽब्दात्मपश्यते वायुतत्त्वं तन्मयतां गतः ।
भ्रुवोर्मध्ये स्मरेद्रूपमात्मनोऽञ्जनसंनिभम् ॥ ३९ ॥
पश्यते वायुतत्त्वेशानशुद्धानखिलानपि ।
घनावृतेन्द्रनीलाभो रविबिम्बसमाकृतिम् ॥ ४० ॥
ध्यायंस्तत्समतामेति तत्संलीनो यदा भवेत् ।
भिन्नेन्द्रनीलसंकाशं सकलं तत्र चिन्तयेत् ॥ ४१ ॥
तन्मन्त्रेशत्वमाप्नोति ततस्तस्येशतामपि ।
सर्वव्यापिनि तद्वर्णे ध्याते तेजस्यवाप्नुयात् ॥ ४२ ॥
तदाप्रधृष्यतामेति तत्रोर्ध्वाधोविसर्पिणि ।
इत्येवं कथिता दिव्या धारणा वायुसंभवा ॥ ४३ ॥
स्वदेहं वायुवद्ध्यात्वा तदभावमनुस्मरन् ।
दिवसैः सप्तभिर्योगी शून्यतां प्रतिपद्यते ॥ ४४ ॥

---

१ क० पु० मुहूर्तादेव खेदत इति पाठः । २ क० पु० चूर्णयन्पत्रसंघातमिति पाठः । ३ क० पु० क्रुद्धश्च जयति शत्रुमिति पाठः ।

मासमात्रेण भोगीन्द्रैरपि दष्टो न मुह्यति ।
सर्वव्याधिपरित्यक्तो वलीपलितवर्जितः ॥ ४५ ॥

षण्मासाद्गगनाकारः सूक्ष्मरन्ध्रैरपि व्रजेत् ।
वत्सरात्रितयात्सार्धाद्व्योमवच्च भविष्यति ॥ ४६ ॥

इच्छयैव महाकायः सूक्ष्मदेहस्तथेच्छया ।
अच्छेद्यश्चाप्यभेद्यश्च च्छिद्रां पश्यति मेदिनीम् ॥ ४७ ॥

शतपुष्परसोच्छिष्टमूषागर्भखवन्निजम् ॥
देहं चिन्तयतस्त्र्यब्दाद्व्योमज्ञानं प्रजायते ॥ ४८ ॥

पूर्वोक्तं च फलं सर्वं सप्ताहादिकमाप्नुयात् ।
ललाटे चिन्तयेत्तद्वद्द्वादशाङ्गुलमायतम् ॥ ४९ ॥

तत्तत्त्वेशान्क्रमात्सर्वान्प्रपश्यत्यग्रतः स्थितान् ।
राहुग्रस्तेन्दुबिम्बाभं ध्यायंस्तत्समतां व्रजेत् ॥ ५० ॥

सकलं चन्द्रबिम्बाभं तत्रस्थमनुचिन्तयेत् ।
तन्मन्त्रेशत्वमाप्नोति ज्योत्स्नया चन्द्रतामपि ॥ ५१ ॥

तयैवाधोविसर्पिण्या सबाह्याभ्यन्तरं बुधः ।
मन्त्रेश्वरेशतामाप्य विज्ञानमतुलं लभेत् ॥ ५२ ॥

तया चोर्ध्वविसर्पिण्या ज्योत्स्नयामृतरूपया ।
स्वतन्त्रत्वमनुप्राप्य न क्वचित्प्रतिहन्यते ॥ ५३ ॥

---

१ व्योम एवेति स्वच्छन्दतन्त्रे प्रमाणितः पाठः ।

इत्येवं पञ्चतत्त्वानां धारणा परिकीर्तिता ।
शुद्धाऽध्वस्था तु संवित्तिभूतावेशोऽत्र पञ्चधा ॥ ५४ ॥
तास्वेव संदधच्चित्तं विषादिक्षयमात्मनः ।
अन्यस्यामपि संवित्तौ यस्यामेव निजेच्छया ॥ ५५ ॥
चेतः सम्यक्स्थिरीकुर्यात्तया तत्फलमश्नुते ।
एकापि भाव्यमानेयमवान्तरविभेदतः ॥ ५६ ॥
अन्तरायत्वमभ्येति तत्र कुर्यान्न संस्थितिम् ।
संस्थितिं तत्र कुर्वन्तो न प्राप्स्यन्त्युत्तमं फलम् ॥५७॥
धारणापञ्चके सिद्धे पिशाचानां गुणाष्टकम् ।
ऐन्द्रान्ताः पञ्च सिद्ध्यन्ति योगिनां भेदतोऽपिवा॥५८
इष्टाः पञ्चदशावस्थाः क्रमेणैव समभ्यसन् ।
त्र्यब्दादाद्यां प्रसाध्यान्यां द्वाभ्यामेकेन चापराम् ॥५९
षण्मासात्पञ्चभिश्चान्यां चतुर्भिस्त्रिभिरेवच ।
द्वाभ्यामेकेन पक्षेण दशभिः पञ्चभिर्दिनैः ॥ ६० ॥
त्रिभिर्द्वाभ्यामथैकेन व्यस्तेच्छोः पूर्ववत्क्रमः ।
शाश्वतं पदमाप्नोति भुक्त्वा सिद्धिं यथेप्सिताम् ॥६१॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे भूतजयाधिकारस्त्रयोदशः ॥ १३ ॥

अथ

चतुर्दशोऽधिकारः ।

अथ गन्धादिपूर्वाणां तन्मात्राणामनुक्रमात् ।
धारणाः संप्रवक्ष्यामि तत्फलानां प्रसिद्धये ॥ १ ॥

पीतकं गन्धतन्मात्रं तुर्याश्रं पर्वसंमितम्[1] ।
नासारन्ध्राग्रगं[2] ध्यायेद्वज्रलाञ्छनलाञ्छितम् ॥ २ ॥

दशमाद्दिवसादूर्ध्वं योगिनोऽनन्यचेतसः ।
कोऽपि[3] गन्धः समायाति द्विधाभूतोऽप्यनेकधा ॥ ३ ॥

ततोऽस्य ऋतुमात्रेण शुद्धो गन्धः स्थिरीभवेत् ।
षड्भिर्मासैः स्वयं गन्धमयमेव भविष्यति ॥ ४ ॥

यो यत्र रोचते गन्धस्तं तत्र कुरुते भृशम् ।
त्र्यब्दात्सिद्धिमवाप्नोति प्रेरितां पाञ्चभौतिकीम् ॥ ५ ॥

तदूर्ध्वमात्मनो रूपं तत्र संचिन्तयेद्धृदि ।
गन्धावरणविज्ञानं त्रिभिरब्दैरवाप्नुयात् ॥ ६ ॥

ईषद्दीप्तियुतं तत्र तन्मण्डलत्रिवर्जितम् ।
ध्यायन्प्रपश्यते सर्वान्गन्धावरणवासिनः ॥ ७ ॥

---

१ स्वच्छ० पञ्चसंमितमिति पाठः । २ क० पु० रन्ध्रान्तकमिति पाठः ।
३ ख० पु० क्वापि गन्ध इति, द्विधाभूतस्य नैकधा, इति च पाठः ।

धरातत्त्वोक्तविम्बाभं तत्रैवमनुचिन्तयन् ।
तत्समानत्वमभ्येति पूर्ववद्धितये स्थिरे ॥ ८ ॥
स्वरूपं तत्र संचिन्त्य भासयन्तमधःस्थितम् ।
तदीशत्वमवाप्नोति पूर्वोक्तेनैव वर्त्मना ॥ ९ ॥
धरातत्त्वोक्तवत्सर्वमत ऊर्ध्वमनुस्मरन् ।
तद्रूपं फलमाप्नोति गन्धावरणसंस्थितम् ॥ १० ॥
रसरूपामतो वक्ष्ये धारणां योगिसेविताम् ।
यया सर्वरसावाप्तिर्योगिनः संप्रजायते ॥ ११ ॥
जलबुद्बुदसंकाशं जिह्वायां चाग्रतः स्थितम् ।
चिन्तयेद्रसतन्मात्रं जिह्वाग्राधारमात्मनः ॥ १२ ॥
सुशीतं षड्रसं चिन्त्यं तद्गतेनान्तरात्मना ।
ततोऽस्य मासमात्रेण रसास्वादः प्रवर्तते ॥ १३ ॥
लवणादीन्परित्यज्य यदा मधुरतां गतः ।
तदा तन्निगिरन्योगी षण्मासान्मृत्युजिद्भवेत् ॥ १४ ॥
जराव्याधिविनिर्मुक्तः कृष्णकेशोऽच्युतद्युतिः ।
जीवेदाचन्द्रतारार्कमभ्यस्यंश्च कचित्कचित् ॥ १५ ॥
पूर्वोक्तबुद्बुदाकारं स्वरूपमनुचिन्तयन् ।
निरावरणविज्ञानमाप्नोतीति किमद्भुतम् ॥ १६ ॥

---

१ क० पु० विम्वान्तमिति पाठः । २ ग० पु० राजनाड्यग्रसंस्थितमिति पाठः ।
३ छ० पु० षड्रसं स्निग्धमिति पाठः । ४ ग० पु० बहुधाकारमिति पाठः ।

तमेव द्युतिसंयुक्तं ध्यायन्नाधारवर्जितम् ।
पश्येत् वत्सरैः सर्वां रसावरणमाश्रिताम् ॥ १७ ॥

जलतत्त्वोक्तबिम्बादि तदूर्ध्वमनुचिन्तयन् ।
पूर्वोक्तं सर्वमाप्नोति रसावरणजं स्फुटम् ॥ १८ ॥

अतो रूपवतीं वक्ष्ये दिव्यदृष्टिप्रदां शुभाम् ।
धारणां सर्वसिद्ध्यर्थं रूपतन्मात्रमाश्रिताम् ॥ १९ ॥

एकान्तस्थो यदा योगी विनिर्मीलितलोचनः ।
शरत्संध्याभ्रसंकाशं यत्तु किंचित्प्रपश्यति ॥ २० ॥

तत्र चेतः समाधाय यावदास्ते दशाहिकम् ।
तावत्प्रपश्यते तत्र बिन्दून्सूक्ष्मतमानपि ॥ २१ ॥

केचित्तत्र सिता रक्ताः पीता नीलास्तथा परे ।
तान्दृष्ट्वा तत्र संदध्यान्मनोऽत्यन्तमनन्यधीः ॥ २२ ॥

षण्मासात्पश्यते तेषु रूपाणि सुबहून्यपि ।
ऽप्यब्दात्तान्येव तेजोभिः प्रदीप्तानि स्थिराणि च ॥ २३ ॥

तान्यभ्यस्यंस्ततो द्व्यब्दाद्बिम्बाकाराणि पश्यति ।
ततोऽब्दात्पश्यते तेजः षण्मासात्पुरुषाकृति ॥ २४ ॥

१ ग० पु० पश्यते वत्सरैरिति पाठः । २ क० पु० बहिर्मीलितलोचन इति पाठः ।
३ क० पु० यत्तत्किंचिदिति पाठः । ४ क० पु० दशाह्निकमिति पाठः ।
५ क० पु० तमानितीति पाठः । ६ क० पु० तेषु इति पाठः ।

त्रिमासाद्व्यापकं तेजो मासात्सर्वं विसर्पितम् ।
कालक्रमाच्च पूर्वोक्तं रूपावरणमाश्रितम् ॥ २५ ॥
तत्सर्वं फलमाप्नोति दिव्यदृष्टिश्च जायते ।
इतीयं कल्पनाशून्या धारणा कृतकोदिता ॥ २६ ॥
दशपञ्चविधो भेदः स्वयमेवात्र जायते ।
यतोऽस्यां निश्चयं कुर्यात्किमन्यैः शास्त्रडम्बरैः ॥५७॥
अतः स्पर्शवतीमन्यां कथयामि तवाधुना ।
धारणां तु यया योगी वज्रदेहः प्रजायते ॥ २८ ॥
षट्कोणमण्डलान्तःस्थमात्मानं परिभावयेत् ।
रूक्षमञ्जनसंकाशं प्रत्यंशं स्फुरिताकुलम् ॥ २९ ॥
ततोऽस्य दशभिर्देवि दिवसैस्त्वचि सर्वतः ।
भवेत्पिपीलिकास्पर्शस्ततस्तमनुचिन्तयन् ॥ ३० ॥
वज्रदेहत्वमासाद्य पूर्वोक्तं पूर्ववल्लभेत् ।
पूर्वोक्तमण्डलाकारं पूर्वरूपं विचिन्तयन् ॥ ३१ ॥
स्पर्शतत्त्वावृतिज्ञानं लभन्केन निवार्यते ।
हीनमण्डलमात्मानं ध्यायेत्तत्पतिसिद्धये ॥ ३२ ॥
यया संसिद्धया सर्वस्पर्शवेदी भविष्यति ।
कर्णौ पिधाय यत्नेन निमीलितविलोचनः ॥ ३३ ॥

१ क० पु० प्रत्यग्रच्छुरिताकुलमिति पाठः ।

यं शृणोति महाघोषं चेतस्तत्रानुसन्धयेत् ।
दीप्यते जाठरो वह्निस्ततोऽस्य दशभिर्दिनैः ॥ ३४ ॥
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ।
यस्तस्यान्ते ध्वनिर्मन्दः किंचित्किंचिद्विभाव्यते ॥ ३५ ॥
सकलात्मा स विज्ञेयस्तदभ्यासादनन्यधीः ।
शब्दावरणविज्ञानमाप्नोति स्थिरतां गतम् ॥ ३६ ॥
यः पुनः श्रूयते शब्दस्तदन्ते शंखनादवत् ।
प्रलयाकलरूपं तदभ्यस्यं तत्फलेप्सुभिः ॥ ३७ ॥
स एवातितरामन्यशब्दप्रच्छादको यदा ।
विज्ञानाकल इत्युक्तस्तदासावपराजिते ॥ ३८ ॥
मनोह्लादकरो योऽन्यस्तदन्ते संविभाव्यते ।
स मन्त्र इति विज्ञेयो योगिभिर्योगकाङ्क्षिभिः ॥ ३९ ॥
ततस्तु श्रूयते योऽन्यः शान्तघण्टानिनादवत् ।
स मन्त्रेश इति प्रोक्तः सर्वसिद्धिफलप्रदः ॥ ४० ॥
घण्टानादविरामान्ते यः शब्दः संप्रजायते ।
मन्त्रेशेशपदं तद्धि सिद्धीनां कारणं महत् ॥ ४१ ॥
अनिलेनाहता वीणा यादृङ्नादं विमुञ्चति ।
तादृशो यो ध्वनिस्तत्र तं विद्याच्छांभवं पदम् ॥ ४२ ॥

१ क० पु० मन्त्रेश इति मन्त्र इति पाठः ।

पृथग्वा क्रमशो वापि सर्वानेतान्समभ्यसेत् ।
प्राप्नोति सर्ववित्सिद्धीः शब्दावरणमाश्रितः ॥ ४३ ॥
इत्येताः कथिताः पञ्च तन्मात्राणां तु धारणाः ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे तन्मात्रधारणाधिकारश्चतुर्दशः ॥ १४ ॥

अथ

पञ्चदशोऽधिकारः ।

अथ वागिन्द्रियादीनां मनोन्तानामनुक्रमात् ।
धारणाः संप्रवक्ष्यामि दशैकां च समासतः ॥ १ ॥

वचनान्तं नमःशब्दमात्मनश्चिन्तयेद्बुधः ।
गृहीतवाक्त्वमभ्येति मौनेन मधुसूदनि ॥ २ ॥

सर्वत्रास्खलिता वाणी षड्भिर्मासैः प्रवर्तते ।
सर्वशास्त्रार्थवेत्तृत्वं वत्सरादुपजायते ॥ ३ ॥

वागेवास्य प्रवर्तेत काव्यालङ्कारभूषिता ।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥ ४ ॥

तत्रैव चिन्तयेद्देहं स्वकीयमनुरूपतः ।
भूयस्तमेव धवलमीषत्तेजोवभासितम् ॥ ५ ॥

रसान्तःसोमबिम्बादितेजोन्तं तमनुस्मरेत् ।
सर्वं फलमवाप्नोति वागावरणजं क्रमात् ॥ ६ ॥

पाणौ च तं समादाय षण्मासाद्दूरसंस्थितम् ।
वस्तु गृह्णात्यसंदेहात्र्यब्दात्पारेऽपि वारिधेः ॥ ७ ॥

तत्रात्मदेहपूर्वं तु पद्माभमनुचिन्तयन् ।
सव्यापारादिभेदेन चतुर्दशकमादरात् ॥ ८ ॥

पूर्वोक्तकालनियमात्पूर्वोक्तेनैव वर्त्मना ।
सर्वं फलमवाप्नोति हस्तावृतिसमाश्रितम् ॥ ९ ॥

पादावेवंविधो ध्यायन्वत्सरत्रयमादरात् ।
मुहूर्तेन समुद्रान्तामश्रान्तो भ्रमति क्षितिम् ॥ १० ॥

चतुर्दश समभ्यर्च्य स्वदेहादिकमभ्यसन् ।
प्राप्नोति पूर्ववत्सर्वफलं पादावृतिस्थितम् ॥ ११ ॥

पायावपि मनस्तत्त्वं स्थिरीकुर्वन्नवाप्स्यति ।
मासेन तद्भवव्याधिविमुक्तिमवलम्बितः ॥ १२ ॥

पुण्यश्लोकत्वमाप्नोति त्रिभिरब्दैरनादरात् ।
चतुर्दशविधं चात्र पूर्ववत्फलमाप्स्यति ॥ १३ ॥

स्वरूपतः स्मरेल्लिङ्गं मासमात्राज्जितेन्द्रियः ।
षड्भिर्मासैरनायासादिच्छाकामित्वमाप्नुयात् ॥ १४ ॥

चतुर्दशविधे भेदे तत्राभ्यस्ते महामतिः ।
लिङ्गावरणजं सर्वं पूर्ववल्लभते फलम् ॥ १५ ॥

स्वजिह्वामिन्दुवर्णाभां चिन्तयेद्दशभिर्दिनैः ।
प्राप्नोत्यनुभवं योगी जिह्वाभवमिवात्मनः ॥ १६ ॥

---

१ ग० पु० पुरोक्तेति पाठः । २ ग० पु० मनस्तद्वदिति पाठः ।
३ क० पु० इच्छासिद्धिमवाप्नुयादिति पाठः ।

आस्वादयति दूरस्थं षण्मासादेकमानसः ।
वत्सरैस्तु त्रिभिः साक्षाल्लेढ्यसौ परमामृतम् ॥ १७ ॥

येनासौ भवति योगी जरामरणवर्जितः ।
अपेयादिप्रसक्तोऽपि न पापैः परिभूयते ॥ १८ ॥

पूर्ववत्सर्वमन्यच्च स्वदेहाद्यनुचिन्तयन् ।
फलमाप्नोत्यसंदेहाद्रसनावृतिसंभवम् ॥ १९ ॥

कनकाभं स्वकं घ्राणमनुचिन्तयतः शनैः ।
दिवसैर्दशभिर्घ्राणशून्यतानुभवो भवेत् ॥ २० ॥

षण्मासाद्गन्धमाघ्राति दूरस्थस्यापि वस्तुनः ।
घातयेद्गन्धमाघ्राय यस्य दुष्टो भविष्यति ॥ २१ ॥

वत्सरैस्तु त्रिभिर्दिव्यं गन्धमासाद्य योगवित् ।
जरामरणनैर्गुण्ययुक्तो दिव्यत्वमर्हति ॥ २२ ॥

सर्वमन्यद्यथोद्दिष्टं तथैव च विचिन्तयेत् ।
क्रमिकं फलमाप्नोति घ्राणावरणमास्थितम् ॥ २३ ॥

उदयादित्यसंकाशे चिन्तयंश्चक्षुषी निजे ।
दशाहाच्चक्षुषो रक्तस्रावानुभवमाप्स्यति ॥ २४ ॥

वेदना महती चास्य ललाटे संप्रजायते ।
न भेतव्यं महादेवि न चाभ्यासं परित्यजेत् ॥ २५ ॥

१ क० पु० स्वकं ज्ञानमिति पाठः ।

संत्यजन्नन्धतामेति तेन यत्नात्समभ्यसेत् ।
षड्भिर्मासैर्महायोगी दिव्यदृष्टिः प्रजायते ॥ २६ ॥

छिद्रां प्रपश्यते भूमिं कटाहान्तामतन्द्रितः ।
आध्रुवान्तमथोर्ध्वं च करामलकवद्बुधः ॥ २७ ॥

वत्सरैस्तु त्रिभिर्योगी ब्रह्माण्डान्तं प्रपश्यति ।
तदन्तर्योगिनीज्ञानं शरीरस्थं प्रजायते ॥ २८ ॥

स्वदेहादिकमन्यच्च पूर्वोक्तं पूर्ववत्स्मरन् ।
नयनाद्वृत्तिजं सर्वमाप्नोतीति किमद्भुतम् ॥ २९ ॥

सर्वत्राञ्जनपत्राभां निस्तरङ्गां त्वचं स्मरन् ।
शस्त्रैरपि न मासेन हन्तुं शक्यो भविष्यति ॥ ३० ॥

षण्मासादतितीव्रेण नाग्निनाप्येष दह्यते ।
वत्सरत्रितयाद्योगी वज्रोपलविषादिभिः ॥ ३१ ॥

पीड्यते न कदाचित्स्यादजरामरतां गतः ।
स्पर्शाद्वृत्तिजविज्ञानगीतवच्च चतुर्दश ॥ ३२ ॥

भेदाः सह फलैर्ज्ञेयाः पूर्वकालानुसारतः ।
किंत्वत्र चिन्तयेद्देहं स्वदेहादिभिरावृतम् ॥ ३३ ॥

संदधानः स्वकं चेतः श्रोत्राकाशे विचक्षणः ।
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ॥ ३४ ॥

---

१ ग० पु० च्छेत्तुं शक्य इति पाठः ।

त्रिभिः संवत्सरैर्देवि ब्रह्माण्डान्तरुदीरितम्।
शृणोति स[1] स्फुटं सर्वं जरामरणवर्जितः॥ ३५॥

तत्राकाशोक्तवत्सर्वं स्वदेहाद्यनुचिन्तयेत्।
श्रोत्रावरणजं सर्वं फलमाप्नोति पूर्ववत्॥ ३६॥

मनोवतीमतो वक्ष्ये धारणां सर्वसिद्धिदाम्।
यया संसिद्धया देवि सर्वसिद्धिफलं लभेत्॥ ३७॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
तस्मात्तदभ्यसेन्मन्त्री यदीच्छेन्मोक्षमव्ययम्[2]॥ ३८॥

तदर्धचन्द्रसंकाशमधोवक्त्रं हृदि स्थितम्।
चिन्तयन्मासमात्रेण प्रतिभां[3] प्रतिपत्स्यते॥ ३९॥

अकस्मात्पश्यते किंचिदकस्माच्छृणुते तथा।
सर्वेन्द्रियात्मकं ज्ञानमकस्माच्च क्वचित्क्वचित्॥ ४०॥

स्वस्वकेन्द्रियविज्ञानं संपश्येद्वत्सरत्रयात्।
भवते योगयुक्तस्य योगिनः सुपरिस्फुटम्॥ ४१॥

स्वदेहादिकमप्यत्र पूर्वोक्तवदनुस्मरन्।
चित्तावरणविज्ञानं प्राप्य सोमगुणं लभेत्॥ ४२॥

---

१ क० पु० विस्फुटं सर्वमिति पाठः। २ ग० पु० मक्षयमिति पाठः।
३ क० पु० पतितां प्रतीति पाठः।

इत्येकादश गीतानि समभ्यस्यानि ते तथा ।
इन्द्रियाणि, यतः सर्वं फलमेव प्रतिष्ठितम् ॥ ४३ ॥

बन्धमोक्षावुभावेताविन्द्रियाणां जगुर्बुधाः ।
विगृहीतानि बन्धाय विमुक्तानि विमुक्तये ॥ ४४ ॥

एतानि व्यापके भावे यदा स्युर्मनसा सह ।
विमुक्तानीति विद्वद्भिर्ज्ञातव्यानि तदा प्रिये ॥ ४५ ॥

यदा तु विषये क्वापि प्रदेशान्तरवर्तिनि ।
संस्थितानि तदा[2] तानि बद्धानीति प्रचक्षते ॥ ४६ ॥

इत्थं[3]यं द्विविधो भावः शुद्धाशुद्धप्रभेदतः ।
इन्द्रियाणां समाख्यातः सिद्धयोगीश्वरीमते ॥ ४७ ॥

इति श्रीमालिनीविजयोत्तरेऽक्षधारणाधिकारः पञ्चदशः ॥ १५

१ तं० इन्द्रियाणीति पाठः । २ क० पु० तदेतानीति पाठः ।
३ तं० इत्येवमिति पाठः ।

अथ

षोडशोऽधिकारः

अथ गर्वमयीं दिव्यां धारणां धारणोत्तमाम् ।
महागर्वकरीं वक्ष्ये योगिनां योगवन्दिते ॥ १ ॥

षोडशारं स्मरेच्चक्रमात्मदेहमनन्यधीः[1] ।
एषोऽहमिति संचिन्त्य स्वकार्यपरिवारितम् ॥ २ ॥

अप्रधृष्यो भवेद्योगी वत्सरत्रितयेन तु ।
ममत्वमच्युतं तस्य भवेत्सर्वत्र कुत्रचित् ॥ ३ ॥

तादृग्रूपस्य चक्रस्य नाभिं मूर्तिं स्वकां स्मरन् ।
चिन्तयेत्सर्वमेवाहं मयि सर्वमवस्थितम् ॥ ४ ॥

ततोऽहङ्कारविज्ञानं प्राप्नोतीति किमद्भुतम् ।
हृच्चक्रे समनुध्यायन्मत्स्वरूपमतन्द्रितः ॥ ५ ॥

अर्कलोकमवाप्नोति गर्वावरणजं फलम् ।
बिम्बादिकं क्रमात्सर्वं चिन्तयन्नीललोहितम् ॥ ६ ॥

तद्भवं सर्वमाप्नोति दशावस्थाप्रचोदितम् ।
इति गर्वमयी प्रोक्ता प्रजापतिगुणप्रदा ॥ ७ ॥

---

१ ख० पु० आत्मन्यहमनन्यधीरिति पाठः ।

उद्यदादित्यबिम्बाभं हृदि पद्ममनुस्मरन् ।
धर्मादिभावसंयुक्तमष्टपत्त्रं सकर्णिकम् ॥ ८ ॥

मासेन स्थिरबुद्धिः स्यात्षड्भिः श्रुतिधरो भवेत् ।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥ ९ ॥

स्वां तत्र चिन्तयेन्मूर्तिं बुद्धितत्त्वं प्रपश्यति ।
तदीशज्ञानमाप्नोति ब्रह्माणमनुचिन्तयन् ॥ १० ॥

वेदानुद्गिरते सप्त ? [सुप्तः] समाधिस्थोऽथवा मुनिः ।
सुस्थिरास्ते सदाभ्यासादनधीता अपि स्फुटम् ॥११॥

बिम्बादिकं क्रमात्सर्वं पूर्वोक्तमनुचिन्तयन् ।
प्राप्नोति ब्राह्ममैश्वर्यं बुद्ध्यावरणमाश्रितम् ॥ १२ ॥

हृदि बिम्बं स्वेध्यायंस्तदन्तः सोममण्डलम् ।
एवमभ्यसतस्तस्य षण्मासादुपजायते ॥ १३ ॥

दिव्यचक्षुरनायासात्सिद्धिः स्याद्वत्सरत्रयात् ।
स्वदेहं चिन्तयंस्तत्र गुणज्ञानमवाप्स्यति ॥ १४ ॥

लिङ्गाकारं स्मरन्दीप्तं तदीशत्वमवाप्नुयात् ।
बिम्बादि पूर्ववद्ध्यायन्दशकं दशकात्मकम् ॥ १५ ॥

---

१ क० पु० उदितादित्येति पाठः ।

फलमाप्नोत्यसंदेहाद्गुणावरणसंस्थितम् ।
चतुर्विंशत्यमी प्रोक्ताः प्रत्येकं दशपञ्चधा ॥ १६ ॥

धारणाः क्ष्मादितत्त्वानां समासाद्योगिनां हिताः ।
त्रयोदशात्मके भेदे षडन्याः संस्थिता यथा ॥ १७ ॥

योगिनामनुवर्ण्यन्ते तथा योगप्रसिद्धये ।
देहं मुक्त्वा स्वरूपेण नान्यत् किंचिदिति स्मरेत्॥१८॥

सितपद्मासनासीनं मण्डलत्रितयोपरि ।
एवमत्र स्थिरीभूते मासमात्रेण योगवित् ॥ १९ ॥

सर्वव्याधिविनिर्मुक्तो भवतीति किमद्भुतम् ।
षण्मासादस्य विज्ञानं जायते पृथिवीतले ॥ २० ॥

अब्दाज्जरादिनिर्मुक्तस्त्रिभिः पुंस्तत्त्वदृग्भवेत् ।
हृदधःपङ्कजेऽत्रैव द्वादशार्धाङ्गुलां तनुम् ॥ २१ ॥

हृदन्ते भावयेत्स्वान्यां षण्मासान्मृत्युजिद्भवेत् ।
त्रिभिरब्दैः समाप्नोति पुंस्तत्त्वेश्वरतुल्यताम् ॥ २२ ॥

बिम्बादौ पूर्ववत्सर्वं तत्र संचिन्तिते सति ।
फलमाप्नोत्यसंदेहात्पुरुषावरणस्थितम् ॥ २३ ॥

एतद्वेदान्तविज्ञानं समासादुपवर्णितम् ।
कापिलस्य पुरा प्रोक्तमेतद्विस्तरशो मया ॥ २४ ॥

---

१ क० पु० विंशतिसंप्रोक्ता इति पाठः ।

शरत्संध्याभ्रसंघाभं स्वदेहमनुचिन्तयन् ।
वीतरागत्वमाप्नोति षड्भिर्मासैर्न संशयः ॥ २५ ॥

जरामरणनिर्मुक्तो वर्षेणैवोपजायते ।
त्र्यब्दाज्ज्ञानमवाप्नोति रागावरणजं महत् ॥ २६ ॥

रक्तं संचिन्तयेद्देहं संपूर्णाभ्रोपरिस्थितम् ।
मासषट्कमनुद्विग्नो वीतरागत्वसिद्धये ॥ २७ ॥

स्मरन्संवत्सरे सम्यङ्मृत्युना न प्रपीड्यते ।
त्रिभिरब्दैर्जितद्वन्द्वो रागे च समतां व्रजेत् ॥ २८ ॥

रक्तपद्मस्थितं रक्तं पञ्चपर्व हृदावधि ।
ध्यायन्फलमवाप्नोति पूर्वोक्तमखिलं क्रमात् ॥ २९ ॥

बिम्बादि चात्र पूर्वोक्तमनुचिन्तयतो मुहुः ।
फलं भवति निःशेषं रञ्जकाद्युतिसंभवम् ॥ ३० ॥

हृदि पद्मं सितं ध्यायेद्व्यष्टपत्रं सकेसरम् ।
सर्वामृतमयं दिव्यं चन्द्रकल्पितकर्णिकम् ॥ ३१ ॥

निश्चलं तत्र संयम्य चेतो निद्रान्तमात्मनः ।
ततो यत्पश्यते स्वप्ने तथ्यं तत्तस्य जायते ॥ ३२ ॥

---

१ क० पु० पर्वहृदावधीति पाठः ।

एवमभ्यसतस्तस्य ताद्धि पद्मोदितं फलम्।
सर्वं प्रजायते तस्यं तत्कालक्रमयोगतः ॥ ३३ ॥

चतुरङ्गुलदेहादि सर्वत्रैवं विचिन्तयन्।
पूर्ववत्सर्वमाप्नोति विद्यातत्त्वसमुद्भवम् ॥ ३४ ॥

हृदयादेकमेकं तु व्यतिक्रम्यार्धमङ्गुलम्।
पृथक् चक्रत्रयं ध्यायेद्रक्तनीलसितं क्रमात् ॥ ३५ ॥

तत्रैत्यब्ध्येकपर्वं तु पुरुषं तत्समद्युतिम्।
विम्बादिकं च यत्प्रोक्तं तत्त्वत्रयमिदं महत् ॥ ३६ ॥

त्रयोदशात्मकं भेदमेतदन्तं विदुर्बुधाः।
एकादशप्रभेदेन तत्त्वद्वयमथोच्यते ॥ ३७ ॥

कण्ठकूपावधौ चक्रे पञ्चारे नाभिसंस्थितम्।
ध्यायेत्स्वरूपमात्मीयं दीप्तनेत्रोपलब्धवत् ॥ ३८ ॥

क्षित्यादिकालतत्त्वान्ते यद्वस्तु स्थितमध्वनि।
सर्वं प्रसाध्य योगीन्द्रो न कालेनाभिभूयते ॥ ३९ ॥

विम्बादिकेऽपि तत्रस्थे योगिनामनुचिन्तिते।
भवतीति कलाश्चर्यमनायासेन तत्फलम् ॥ ४० ॥

---

१ ग० पु० प्रजायते देवीति पाठः।   २ क० पु० तत्र तिथ्येकपर्वमिति पाठः।

कण्ठाकाशे स्थिरं चेतः कुर्वन्योगी दिने दिने ।
मायोत्थं फलमाप्नोति विम्बादाऽपि तत्रगे ॥ ४१ ॥

कण्ठकूपविधानाभं राहुग्रस्तेन्दुविम्ववत् ।
चिन्तयन्न पुनर्याति मायादेर्वशवर्तिताम् ॥ ४२ ॥

तदेव तत्र स्वर्भानुमुक्तवत्परिचिन्तयन् ।
तेजोदेहादिकं चापि प्राप्नोति परमेशताम् ॥ ४३ ॥

मध्यन्दिनकराकारं लम्बकस्थं विचिन्तयेत् ।
समस्तमन्त्रचक्रस्य रूपं यत्सामुदायिकम् ॥ ४४ ॥

ततः कालक्रमाद्योगी मन्त्रत्वमधिगच्छति ।
अनुषङ्गफलं चात्र पूर्वोक्तं सर्वमिष्यते ॥ ४५ ॥

मूर्तिं तत्रैव संचिन्त्य मन्त्रेशत्वमवाप्नुयात् ।
तदधो दीपकं तेजो ध्यात्वा तत्पतितां व्रजेत् ॥ ४६ ॥

सबाह्याभ्यन्तरं तस्मादधोर्ध्वं व्यापि च स्मरन् ।
तेजो मन्त्रेश्वरेशानपदान्न च्यवते नरः ॥ ४७ ॥

बद्ध्वा पद्मासनं योगी पराबीजमनुस्मरन् ।
भ्रुवोर्मध्ये न्यसेच्चित्तं तद्बहिः किंचिदग्रतः ॥ ४८ ॥

निमीलिताक्षो हृष्टात्मा शब्दालोकविवर्जिते ।
पश्यते पुरुषं तत्र द्वादशाङ्गुलमायतम् ॥ ४९ ॥

तत्र चेतः स्थिरं कुर्यात्ततो मासत्रयोपरि ।
सर्वावयवसंपूर्णं तेजोरूपमचञ्चलम् ॥ ५० ॥

प्रसन्नमिन्दुसंकाशं पश्यति दिव्यचक्षुषा ।
तं दृष्ट्वा पुरुषं दिव्यं कालज्ञानं प्रवर्तते ॥ ५१ ॥

अशिरस्के भवेन्मृत्युः षण्मासाभ्यन्तरेण तु ।
वञ्चनं तत्र कुर्वीत यत्नात्कालस्य योगवित् ॥ ५२ ॥

ब्रह्मरन्ध्रोपरि ध्यायेच्चन्द्रबिम्बमकल्मषम् ।
स्रवन्तममृतं दिव्यं स्वदेहापूरकं बहु ॥ ५३ ॥

तेनापूरितमात्मानं चेतोनालानुसर्पिणा ।
सबाह्याभ्यन्तरं ध्यायन्दशाहान्मृत्युजिद्भवेत् ॥ ५४ ॥

महाव्याधिविनाशेऽपि योगमेनं समभ्यसेत् ।
प्रसङ्गव्याधिनाशाय प्रत्यङ्गाङ्गमनुस्मरन् ॥ ५५ ॥

धूमवर्णं यदा पश्येन्महाव्याधिस्तदा भवेत् ।
कृष्णे कुष्ठमवाप्नोति नीले शीतलिकाभयम् ॥ ५६ ॥

हीनचक्षुषि तद्रोगं नासाहीने तदात्मकम् ।
यत्तदङ्गं न पश्येत तत्र तद्व्याधिमादिशेत् ॥ ५७ ॥

आत्मनो वा परेषां वा योगी योगपथे स्थितः ।
वर्षैस्तु पञ्चभिः सर्वं विद्यात्तत्त्वान्तमीश्वरि ॥ ५८ ॥

वेत्ति भुङ्क्ते च सततं न च तस्मात्प्रहीयते ।
तत्रस्थे तेजसि ध्याते सर्वदेहविसर्पिणि ॥ ५९ ॥

पूर्वोक्तं सर्वमाप्नोति तत्कालक्रमयोगतः ।
अथोर्ध्वव्यापिनि ध्याने तत्र तस्मादखण्डितः ॥ ६० ॥

सर्वमन्त्रेश्वरेशत्वान्न भूयोऽपि निवर्तते ।
एवं ललाटदेशेऽपि महादीप्तमनुस्मरन् ॥ ६१ ॥

प्रपश्यत्यचिरादेव वर्णाष्टकयुतं क्रमात् ।
इन्द्रनीलप्रतीकाशं शिखिकण्ठसमद्युति ॥ ६२ ॥

राजावर्तनिभं चान्यत्तथा वैदूर्यसंनिभम् ।
पुष्परागनिभं चान्यत्प्रवालकसमद्युति ॥ ६३ ॥

पद्मरागप्रतीकाशमन्यच्चन्द्रसमद्युति ।
तां दृष्ट्वा परमां ज्योत्स्नां दिव्यज्ञानं प्रवर्तते ॥ ६४ ॥

विहारपादचारादि ततः सर्वं प्रवर्तते ।
अधोर्ध्वं व्यापिनि ध्याते न तस्माच्च्यवते पदात् ॥६५॥

इत्येतत्सर्वमाख्यातं लक्ष्यभेदव्यवस्थितम् ।
अधुना चित्तभेदोऽपि समासादुपदिश्यते ॥ ६६ ॥

पिशाचानन्तपर्यन्तगुणाष्टकसमीहया ।
तत्तद्रूपगुणं कुर्यात्सम्यगीशे स्थिरं मनः ॥ ६७ ॥

इतीश्वरपदान्तस्य मार्गस्यास्य पृथक् पृथक् ।
यथोपास्ता तथाख्याता योगिनां योगसिद्धये ॥ ६८ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे धारणाधिकारः षोडशः ॥ १६ ॥

अथ

सप्तदशोऽधिकारः

अथैतत्सर्वमुद्दिष्टं यदि न स्फुटतां व्रजेत् ।
स्फुटीकृते स्थिते तत्र न मनस्तिष्ठते स्फुटम् ॥ १ ॥

गतिभङ्गं ततस्तस्य प्राणायामेन कारयेत् ।
स च पञ्चविधः प्रोक्तः पूरकादिप्रभेदतः ॥ २ ॥

पूरकः कुम्भकश्चैव रेचको ह्यपकर्षकः ।
उत्कर्षः पञ्चमो ज्ञेयस्तदभ्यासाय योगिभिः ॥ ३ ॥

पूरकः पूरणाद्वायोर्द्वेधा षोढा च गीयते ।
स्वभावपूरणादेको विरेच्यान्यः प्रपूरितः ॥ ४ ॥

नासामुखोर्ध्वतालूनां रन्ध्रभेदाद्विभिद्यते ।
भिन्नः षोढात्वमभ्येति पुनर्भेदैरनन्तताम् ॥ ५ ॥

कुम्भः पञ्चविधो ज्ञेयस्तत्रैकः पूरितादनु ।
विधृतो रेचकात्पश्चाद्द्वितीयः प रिकीर्तितः ॥ ६ ॥

द्वयोरन्ते द्वयं चान्यत्स्वभावस्थश्च पञ्चमः ।
स्थानान्तरप्रभेदेन गच्छत्येषोऽप्यनन्तताम् ॥ ७ ॥

रेचकः पूर्ववज्ज्ञेयो द्विधाभूतः षडात्मकः ।
स्थानसंस्तम्भितो वायुस्तस्मादुत्कृष्य नीयते ॥ ८ ॥

योऽन्यप्रदेशसंप्राप्त्यै स उत्कर्षक इष्यते ।
तस्मादपि पुनः स्थानं यतो नीतस्तदाहृतः ॥ ९ ॥
अपकर्षक इत्युक्तो द्वावप्येतावनेकधा ।
एषामभ्यसनं कुर्यात्पद्मकाद्यासनस्थितः ॥ १० ॥
अधमः सकृदुद्घातो मध्यमः सिद्धिदो मतः ।
ज्येष्ठः स्याद्यस्त्रिरुद्घातः स च द्वादशमात्रकः ॥ ११ ॥
त्रिर्जानुवेष्टनान्मात्रात्रिगुणाच्छोटिकात्रयात् ।
अजितां नाक्रमेन्मात्रां वायुदोषनिवृत्तये ॥ १२ ॥
प्रत्यङ्गधारणाद्वायुं न च चक्षुषि धारयेत् ।
नाभिहृत्तालुकण्ठस्थे विवृते मरुति क्रमात् ॥ १३ ॥
चतस्रो धारणा ज्ञेया शिख्यम्ब्वीशामृतात्मिकाः ।
यद्यत्र चिन्तयेद्द्रव्यं तत्तत्सर्वगतं स्मरेत् ॥ १४ ॥
बिन्दुनादात्मकं रूपमीशानीं धारणां श्रितम् ।
अमृतायाः स्मरेदिन्दुं कालत्यागोक्तवर्त्मना ॥ १५ ॥
धारणाभिरिहैताभिर्योगी योगपथे स्थितः ।
हेयं वस्तु परित्यज्य यायात्पदमनुत्तमम्[1] ॥ १६ ॥
त्रिवेदद्वीन्दुसंख्यातसमुद्घातास्त्विमा मताः ।
एताभिरप्यधोऽप्युक्तं फलं प्राप्नोत्यनुत्तमम् ॥ १७ ॥

---

१ ग० पु० पदमनामयमिति पाठः ।

योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम् ।
हेयाद्यालोचना तस्मात्तत्र यत्नः प्रशस्यते ॥ १८ ॥
मार्गे चेतः स्थिरीभूते हेयेऽपि विपयेच्छया ।
प्रेर्यं तेनानयेत्तावद्यावत्पदमनामयम् ॥ १९ ॥
तदर्थभावनायुक्तं मनोध्यानमुदाहृतम् ।
तदेव परमं ज्ञानं भावनामयमिष्यते ॥ २० ॥
मुहूर्तादेव तत्रस्थः समाधिं प्रतिपद्यते ।
तत्रापि च सुनिष्पन्ने फलं प्राप्नोत्यभीप्सितम् ॥२१॥
यत्किंचिच्चिन्तयेद्वस्तु नान्यत्वं प्रतिपद्यते ।
तेन तन्मयतामाप्य भवेत्पश्चादभाववत् ॥ २२ ॥
पञ्चतामिव संप्राप्तस्तीव्रैरपि न चाल्यते ।
ततः शब्दादिभिर्योगी योगिनीकुलनन्दनः ॥ २३ ॥
इत्यनेन विधानेन प्रत्याहृत्य मनो मुहुः ।
प्राणायामादिकं सर्वं कुर्याद्योगप्रसिद्धये ॥ २४ ॥
सर्वमप्यथवा भोगं मन्यमानो विरूपकम् ।
स्वशरीरं परित्यज्य शाश्वतं पदमृच्छति ॥ २५ ॥
तदा पूर्वोदितं न्यासं कालानलसमप्रभम् ।
विपरीतविधानेन कुर्या........द्वियुग्मताम् ॥ २६ ॥
आग्नेयीं धारणां कृत्वा सर्वमर्मप्रतापिनीम् ।
पूरयेद्वायुना देहमङ्गुष्ठान्मस्तकान्तिकम् ॥ २७ ॥

तमुत्कृष्य ततोऽङ्गुष्ठाद्ब्रह्मरन्ध्रान्तमानयेत् ।
छेदयेत्सर्वमर्माणि मन्त्रेनानेन योगवित् ॥ २८ ॥
जीवमादिद्विजारूढं शिरोमालादिसंयुतम् ।
कृत्वा तदग्रे कुर्वीत द्विजमाद्यमजीवकम् ॥ २९ ॥
इत्येषा कथिता कालरात्रिर्मर्मनिकृन्तनी ।
नैनां समुच्चरेद्देवि य इच्छेद्दीर्घजीवितम् ॥ ३० ॥
शतार्धोच्चारयोगेन जायते मूर्ध्नि वेदना ।
एवं प्रत्ययमालोच्य मृत्युजिद्ध्यानमाश्रयेत् ॥ ३१ ॥
निपीड्य तं ततस्तत्र बिन्दुनादादिचिन्तकम् ।
वेगादुत्कृष्य तत्रस्थकालरात्रीं विसर्जयेत् ॥ ३२ ॥
.... सिद्धयोगीश्वरी मते ।
तत्सकाशाद्भवेत्सिद्धिः सर्वमन्त्रोक्तलक्षणा ॥ ३३ ॥
तदेव मन्त्ररूपेण म [नुष्यैः] समुपास्यते ।
एष ते ज्ञेयसद्भावः कथितः सुरवन्दिते ॥ ३४ ॥
अभक्तस्य गुहस्यापि नाख्येयो जातुचिन्मया ।
उदरं सर्वमापूर्य ब्रह्मरन्ध्रान्तमागतम् ॥ ३५ ॥
वायुं भ्रमणयोगेन ततस्तं प्रेरयेत्तथा ।
यावत्प्राणप्रदेशान्तं योगिनां मनसेप्सितम् ॥ ३६ ॥

---

१ क० पु० माद्यं सजीवकमिति पाठः । २ क० पु० तदा भ्रमणेति पाठः

व्याप्यते पुनरा [हृत्य] तथैव नाभिमण्डलम् ।
एवं समभ्यसेत्तावद्यावद्वासरसप्तकम् ॥ ३७ ॥
तदाप्रभृति संयुक्तः कर्पयेत्त्रिदशानपि ।
अनेनाकृष्य विज्ञानं सर्वयोगिनिषेवितम् ॥ ३८ ॥
गृह्णीयाद्योगयुक्तात्मा किमन्यैः क्षुद्रशासनैः ।
प्रथमं महती घूर्णिरभ्यासात्तस्य जायते ॥ ३९ ॥
ततः प्रकम्पो देवेशि ज्वलतीव ततोऽप्यणुः ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे सप्तदशोऽधिकारः ॥ १७ ॥

अथ

अष्टादशोऽधिकारः ।

शृणु देवि परं गुह्यमप्राप्यमकृतात्मनाम् ।
यन्न कस्यचिदाख्यातं तदद्य कथयामि ते ॥ १ ॥

सर्वमन्यत्परित्यज्य चित्तमत्र निवेशयेत् ।
मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत् ॥ २ ॥

यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम् ।
बहिर्लिङ्गस्य लिङ्गत्वमनेनाधिष्ठितं यतः ॥ ३ ॥

अतः प्रपूजयेदेतत्परमाद्वैतमाश्रितः ।
अनुध्यानेन देवेशि परेण परमाणुना ॥ ४ ॥

योऽनुध्यातः स एवैतल्लिङ्गं पश्यति नापरः ।
यदेतत्स्पन्दनं नाम हृदये समवस्थितम् ॥ ५ ॥

तत्र चित्तं समाधाय कम्प उद्भव एव च ।
तत्र प्रशान्तिमापन्ने मासेनैकेन योगवित् ॥ ६ ॥

हृदयादुत्थितं लिङ्गं ब्रह्मरन्ध्रान्तमीश्वरि ।
स्वप्रभोद्योतिताशेषदेहान्तममलद्युति ॥ ७ ॥

तत्रैव पश्यते सर्वं मन्त्रजालं महामतिः ।
तन्मस्तकं समारुह्य मासमात्रमनन्यधीः ॥ ८ ॥

१ ग० पु० मन्येनाधिष्ठितामिति पाठः ।

ततस्तत्र सुनिष्पन्ने षण्मासात्सर्वसिद्धयः ।
एतल्लिङ्गमविज्ञाय यो लिङ्गी लिङ्गमाश्रयेत् ॥ ९ ॥
वृथा परिश्रमस्तस्य न लिङ्गफलमश्नुते ।
शैवमेतन्महालिङ्गमात्मलिङ्गे [न] सिद्ध्यति ॥ १० ॥
सिद्धेऽत्र लिङ्गवल्लिङ्गी लिङ्गस्थो लिङ्गवर्जितः ।
भवतीति किमाश्चर्यमेतस्माल्लिङ्गलिङ्गितः ॥ ११ ॥
अनेन लिङ्गलिङ्गेन यदा योगी बहिर्व्रजेत् ।
तदा लिङ्गीति विज्ञेयः पुरान्तं लिङ्गमिष्यते ॥ १२ ॥
एतस्माल्लिङ्गविज्ञानाद्योगिनो लिङ्गिताः स्मृताः ।
अनेनाधिष्ठिताः मन्त्राः शान्तरौद्रादिभेदतः ॥ १३ ॥
भवन्तीति किमाश्चर्यं तद्भावगतचेतसः ।
रौद्रं भावं समाश्रित्य यदि योगं समभ्यसेत् ॥ १४ ॥
दुर्निरीक्ष्यो भवेत्सर्वैः सदेवासुरमानुषैः ।
गमागमविनिर्मुक्तः सर्वदृष्टिरकातरः ॥ १५ ॥
मुहूर्तं तिष्ठते यावत्तावद्वेशमाप्नुयात् ।
आविष्टः पश्यते सर्वं सूर्यकोटिसमद्युति ॥ १६ ॥
यत्तदक्षरमव्यक्तं शैवं भैरवमित्यपि ।
तं दृष्ट्वा वत्सरार्धेन योगी सर्वज्ञतामियात् ॥ १७ ॥
य एवैनं समासाद्य यस्तृप्तिमधिगच्छति ।
न च कृत्रिमयोगेषु स मुक्तः सर्वबन्धनैः ॥ १८ ॥

प्राणायामादिकैर्लिङ्गैर्योगाः स्युः कृत्रिमा मताः ।
तेन तेऽकृतकस्यास्य कलां नार्हन्ति षोडशीम् ॥१९॥
एतत्समभ्यसन्योगी दिव्यचिह्नानि पश्यति ।
उपविष्ट ऋजुर्योगी न किञ्चिदपि चिन्तयेत् ॥ २० ॥
मुहूर्तान्निर्दहेत्सर्वं देहस्थमकृतं कृतम् ।
दह्यमानस्य तस्येह प्रकम्पानुभवो भवेत् ॥ २१ ॥
ततस्तत्र स्थिरीभूते ज्योतिरन्तः प्रकाशते ।
तां दृष्ट्वा परमां दीप्तिं दिव्यज्ञानं प्रवर्तते ॥ २२ ॥
स्वतन्त्रशिवतामेति भुञ्जानो विषयानपि ।
अनिमीलितदिव्याक्षो यावदास्ते मुहूर्तकम् ॥ २३ ॥
तस्मात्सर्वगतं भावमात्मनः प्रतिपद्यते ।
तमेव भावयेद्यत्नात्सर्वसिद्धिफलेप्सया ॥ २४ ॥
ततस्तं भावयेद्योगी कम्पमानोऽत्यनुल्बणम् ।
ततः प्रपश्यते तेजो ललाटाग्रे समन्ततः ॥ २५ ॥
दृष्ट्वा तत्परमं तेजो दिव्यज्ञानमवाप्नुयात् ।
षड्भिर्मासैरनायासाद्वत्सरेण प्रसिद्ध्यति ॥ २६ ॥
शिवतुल्यबलो भूत्वा यत्रेष्टं तत्र गच्छति ।
चेतः सर्वगतं कृत्वा मुहूर्तादेव योगवित् ॥ २७ ॥

---

१ क० पु० परतमं तेज इति पाठः ।

शक्त्यावेशमवाप्नोति प्रकम्पानुभवात्मकम् ।
ततस्तत्र स्थिरीभूते मासमात्रेण योगवित् ॥ २८ ॥
शाक्तं प्रपश्यते तेजः सबाह्याभ्यन्तरे स्थिरम् ।
तत्र सम्यक् सुनिष्पन्ने सर्वेन्द्रियजमादरात् ॥ २९ ॥
तत्र स्फुटमवाप्नोति विज्ञानमनिवारितम् ।
सर्वगं चात्र विज्ञेयं यदक्षार्थेन संगतम् ॥ ३० ॥
एकमेवेदमाख्यातं तत्त्वं पर्यायभेदतः ।
कर्मेन्द्रियाणि बुद्ध्यन्तं परित्यज्य समस्तकम् ॥ ३१ ॥
भावयेत्परमां शक्तिं सर्वत्रैव विचक्षणः ।
निश्चलं तु मनः कृत्वा यावत्तन्मयतां गतः ॥ ३२ ॥
तावत्सर्वगतं भावं क्षणमात्रात्प्रपद्यते ।
निर्दह्य पाशजालानि यथेष्टं फलमाप्नुयात् ॥ ३३ ॥
तस्मात्समभ्यसेदेनं कृत्वा निश्चयमात्मनः ।
यत्राधारविनिर्मुक्तो जीवो लयमवाप्स्यति ॥ ३४ ॥
तत्स्थानं सर्वमन्त्राणामुत्पत्तिक्षेत्रमिष्यते ।
द्विविधं तत्परिज्ञेयं बाह्याभ्यन्तरभेदतः ॥ ३५ ॥
प्रयातव्याधिका मात्रा सा ज्ञेया सर्वसिद्धिदा ।
अथवा गच्छतस्तस्य स्वप्रवृत्त्या विचक्षणः ॥ ३६ ॥

१ ग० पु० यदक्षार्थैर्न संगतमिति पाठः ।
२ क० पु० उत्पत्तिस्थानमिति पाठः।

निरोधं मध्यमे स्थाने कुर्वीत क्षणमात्रकम् ।
पश्यते तत्र चिच्छक्तिं त्रुटिमात्रामखण्डिताम् ॥ ३७ ॥
तदेव परमं तत्त्वं तस्माज्जातमिदं जगत् ।
स एव मन्त्रदेहस्तु सिद्धयोगीश्वरीमते ॥ ३८ ॥
तेनैवालिङ्गिता मन्त्राः सर्वसिद्धिफलप्रदाः ।
ईपव्द्याप्टत्तवर्णस्तु हेयोपादेयवर्जितः ॥ ३९ ॥
यां संवित्तिमवाप्नोति शिवतत्त्वं तदुच्यते ।
तत्र चित्तं स्थिरीकुर्वन्सर्वज्ञत्वमवाप्नुयात् ॥ ४० ॥
तत्रैव दिव्यचिह्नानि पश्यते च न संशयः ।
यत्रैव कुत्रचिद्गात्रे विकार उपजायते ॥ ४१ ॥
संकल्पपूर्वको देवि तत्तत्त्वं तत्त्वमुत्तमम् ।
तदभ्यसेन्महायोगी सर्वज्ञत्वजिगीषया ॥ ४२ ॥
प्राप्नोति परमं स्थानं भुक्त्वा सिद्धिं यथेप्सिताम् ।
गन्धपुष्पादिभिर्योगी नित्यमात्मानमादरात् ॥ ४३ ॥
ब्रह्मरन्ध्रप्रदेशे तु पूजयेद्भावतोऽपि वा ।
द्रवद्रव्य[1]समायोगात्स्नपनं तस्य जायते ॥ ४४ ॥
गन्धपुष्पादिगन्धस्य ग्रहणं यजनं मतम् ।
षड्रसास्वादनं तस्य नैवेद्याय प्रकल्पते ॥ ४५ ॥

---

१ क० पु० द्रव्याद्रव्येति ।

यमेवोच्चारयेद्वर्णं स जपः परिकीर्तितः ।
तत्र चेतः समाधाय दह्यमानस्य वस्तुनः ॥ ४६ ॥
ज्वालान्तास्तिष्ठते यावत्तावद्धोम[1]ः कृतो भवेत् ।
यदेव पश्यते रूपं तदेव ध्यानमिष्यते ॥ ४७ ॥
प्रसङ्गादिदमुद्दिष्टमद्वैतयजनं महत् ।
उदयार्कसमाभा[2]समूर्ध्वद्वारे मनः स्थिरम् ॥ ४८ ॥
हृदि वा तत्तथा कुर्याद्द्वादशान्तेऽथ वामुयात् ।
ततो मासार्धमात्रेण तद्रूपमुपलभ्यते ॥ ४९ ॥
उपलब्धं तदभ्यस्य सर्वज्ञत्वाय कल्पते ।
वस्त्रेण मुखमाच्छाद्य योगी लक्ष्ये नियोजयेत् ॥५०॥
नाभिकन्दादधस्तात्तु यावत्तत्त्वं शिखावधि ।
सूक्ष्मतारकसंकाशं रश्मिज्वालाकरालितम् ॥ ५१ ॥
प्राणशक्त्यवसाने तु पश्यते रूपमात्मनः ।
तदेवाभ्यसतो देवि विकासमुपगच्छति ॥ ५२ ॥
तन्मुखं सर्वमन्त्राणां सर्वतन्त्रेषु पठ्यते ।
ततोऽस्य मासमात्रेण काचित्संवित्तिरिष्यते ॥ ५३ ॥
यतः सर्वं विजानाति हृदये संव्यवस्थितम् ।
तां ज्ञात्वा कस्यचिद्योगी न सम्यक्प्रतिपादयेत् ॥५४॥

---

१ ग० पु० तावद्धूम इति पाठः । २ क० पु० समाभ्यासेति पाठः ।

अध्यायात्कथनं कुर्यान्नाकाले मृत्युमाप्नुयात् ।
मृतोऽपि श्वभ्रसंघाते क्रमेण परिपच्यते ॥ ५५ ॥

एवं ज्ञात्वा महादेवि स्वाहितं समुपार्जयेत् ।
शिष्योऽप्यन्यायतो गृह्णन्नरकं प्रतिपद्यते ॥ ५६ ॥

न च तत्कालमाप्नोति वचस्त्ववितथं मम ।
न्यायेन ज्ञानमासाद्य पश्चान्न प्रतिपद्यते ॥ ५७ ॥

तदा तस्य प्रकुर्वीत विज्ञानापहृतिं बुधः ।
ध्यात्वा तमग्रतः स्थाप्य स्वरूपेणैव योगवित् ॥५८॥

षड्विधं विन्यसेन्मार्गं तस्य देहे पुरोक्तवत् ।
ततस्तं दीपमालोक्य तदङ्गुष्ठाग्रतः क्रमात् ॥ ५९ ॥

नयेत्तेजः समाहृत्य द्वादशान्तमनन्यधीः ।
ततस्तं तत्र संचिन्त्य शिवेनैकत्वमागतम् ॥ ६० ॥

तत्र ध्यायेत्तमोरूपं तिरोभावनशीलनम् ।
पतन्तीं तेन मार्गेण ह्यङ्गुष्ठाग्रान्तमागताम् ॥ ६१ ॥

सबाह्याभ्यन्तरं ध्यायेन्निबिडाञ्जनसप्रभाम् ।
अनेन विधिना तस्य मूढबुद्धेर्दुरात्मनः ॥६२॥

विज्ञानमन्त्रविद्याद्या न कुर्वन्त्युपकारिताम् ।
चित्ताभिसंधिमात्रेण ह्यदृष्टस्यापि जायते ॥६३॥

कथंचिदुपलब्धस्य नित्यमेवापकारिणः ।
अथवा सूर्यबिम्बाभं ध्यात्वा विच्छेद्यमग्रतः ॥ ६४ ॥

स्वभानुरूपया शक्त्या ग्रस्तं तमनुचिन्तयेत् ।
अपराधसहस्रैस्तु कोपेन महतान्वितः ॥ ६५ ॥
विधिमेनं प्रकुर्वीत क्रीडार्थं न तु जातुचित् ।
अनेन विधिना भ्रष्टो विज्ञानादपरेण च ॥ ६६ ॥
न शक्यो योजितुं भूयो यावत्तेनैव नोद्धृतः ।
करुणाकृष्टचित्तस्तु तस्य कृत्वा विशोधनम् ॥ ६७ ॥
प्राणायामादिभिस्तीव्रैः प्रायश्चित्तैर्विधिश्रुतैः ।
ततस्तस्य प्रकुर्वीत दीक्षां पूर्वोक्तवर्त्मना ॥ ६८ ॥
ततः सर्वमवाप्नोति फलं तस्मादनन्यधीः ।
एवं ज्ञात्वा प्रयत्नेन गुरुमासादयेत्सुधीः ॥ ६९ ॥
यतः संतोष उत्पन्नः शिवज्ञानामृतात्मकः ।
न तस्यान्वेषयेद्वृत्तं शुभं वा यदि वाशुभम् ॥ ७० ॥
स एव तद्विजानाति युक्तं वायुक्तमेव वा ।
अकार्येषु यदा सक्तः प्राणद्रव्यापहारिषु ॥ ७१ ॥
तदा निवारणीयोऽसौ प्रणतेन विपश्चिता ।
तेनातिवार्यमाणोऽपि यद्यसौ न निवर्तते ॥ ७२ ॥
तदान्यत्र क्वचिद्गत्वा शिवमेवानुचिन्तयेत् ।
एष योगविधिः प्रोक्तः समासाद्योगिनां हितः ॥७३॥
नात्र शुद्धिर्नचाशुद्धिर्न भक्ष्यादिविचारणम् ।
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च ॥ ७४ ॥

न चापि तत्परित्यागो निष्परिग्रहतापि वा ।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः ॥ ७५ ॥
तत्त्यागो न व्रतादीनां चरणाचरणं च यत् ।
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम् ॥ ७६ ॥
परस्वरूपलिङ्गादि[1] नामगोत्रादिकं च यत् ।
नास्मिन्विधीयते किंचिन्न चापि प्रतिषिध्यते ॥७७॥
विहितं सर्वमेवात्र[2] प्रतिषिद्धमथापि वा ।
किंत्वेतदत्र देवेशि नियमेन विधीयते ॥ ७८ ॥
तत्त्वे चेतः स्थिरीकार्यं सुप्रयत्नेन योगिना ।
तच्च यस्य यथैव स्यात्स तथैव समाचरेत् ॥ ७९ ॥
तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि ।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा ॥ ८० ॥
विषापहारिमन्त्रादिसंनद्धो[3] भक्षयन्नपि ।
विषं न मुह्यते तेन तद्वद्योगी महामतिः ॥ ८१ ॥
इत्येतत्कथितं देवि किमन्यत्परिपृच्छसि ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे परमविद्याधिकारो
नामाष्टादशोऽधिकारः ॥ १८ ॥

---

१ क० पु० परलिङ्गस्वरूपादीति पाठः । २ क० पु० सर्वमेवेदमिति पाठः ।
३ ख० पु० तं० च मन्त्रादिसंयुक्त इति पाठः ।

अथ

एकोनविंशोऽधिकारः ।

अथैनं परमं योगविधिमाकर्ण्य शाङ्करी ।
पुनराह प्रसन्नास्या प्रणिपत्य जगद्गुरुम् ॥ १ ॥
साध्यत्वेन श्रुता देव भिन्नयोनिस्तु मालिनी ।
विद्यात्रयं सविद्याङ्गं विधिवच्चावधारितम् ॥ २ ॥
अधुना श्रोतुमिच्छामि ह्यभिन्ना साध्यते कथम् ।
हिताय साधकेन्द्राणां प्रसादाद्वक्तुमर्हसि ॥ ३ ॥
एवमुक्तो महेशान्या जगतां पतिरादरात् ।
विकसद्वदनाम्भोजः प्रत्युवाच वचोऽमृतम् ॥ ४ ॥
आरिराधयिषुः शंभुं कुलोक्तविधिना बुधः ।
कुलचक्रं यजेदादौ बुधो दीक्षोक्तवर्त्मना ॥ ५ ॥
ततो जपेत्परां शक्तिं लक्षमेकमखण्डितम् ।
पराबीजपुटान्तःस्थां न द्रुतां न विलम्बिताम् ॥ ६ ॥
तद्वत्खण्डाष्टकं चास्या लक्षं लक्षमखण्डितम् ।
जपेत्कुलेश्वरस्यापि लक्षषट्कमनन्यधीः ॥ ७ ॥
होमयित्वा दशांशेन द्रव्यं पूर्वोदितं बुधः ।
नित्यानुस्मृतिशीलस्य वाक्सिद्धिः संप्रजायते ॥ ८ ॥

स्वकुले जपयुक्तस्य अशक्तस्यापि साधने ।
भवन्ति कन्यसा देवि[1] संसारे भोगसंपदः ॥ ९ ॥

शक्तस्तु साधयेत्सिद्धिं मध्यमामुत्तमामपि ।
कृतसेवाविधिः पृथ्वीं भ्रमेदुद्भ्रान्तपत्रिवत्[2] ॥ १० ॥

नगरे पञ्चरात्रं तु त्रिरात्रं पत्तने तु वै ।
ग्रामेऽपि चैकरात्रं तु स्थित्वैनं विधिमाचरेत् ॥ ११ ॥

यन्नामाद्यक्षरं यत्र वर्गे तत्तस्य[3] वस्तुनः ।
कुलमुक्तं विधानज्ञैर्नगरादेर्न संशयः ॥ १२ ॥

या यत्र देवता वर्गे वाच्यत्वे संव्यवस्थिता[4] ।
सैव तस्य पतित्वेन ध्येया पूज्या च साधकैः ॥ १३ ॥

तस्य किंचित्समासाद्य नगरादिकमादरात् ।
स्वदिग्वर्गस्थितो[5] भूत्वा चक्रं योज्य[6] निजोदये ॥१४॥

अवा.........समेकैक उदिते.......... ।
देवता माहेश्वर...................... ॥ १५ ॥

क्रमेणैव यथा रात्रौ..........तथा दिवा ।
स्वदिशि स्वोदये वर्गं तमेवानुस्मरेद्बुधः ॥ १६ ॥

---

१ ग० पु० कन्यका देवीति पाठः । २ ग० पु० पत्रवदिति पाठः ।
३ क० पु० वर्गतत्त्वस्येति पाठः । ४ क० पु० संव्यवस्थितिरिति पाठः ।
५ ग० पु० स्वदिशि संस्थित इति । ६ नियोजयेत् इति पाठः ।

तिष्ठेदन्योदयं यावत्ततः स्वां दिशमाश्रयेत् ।
स्वकुलं चिन्तयन्यायात्तद्देशकुलमेव वा ॥ १७ ॥
यावदन्यां दिशं मन्त्री ततस्तदनुचिन्तयेत् ।
एवं यावत्स्वकं स्थानं कुलचक्रोक्तवर्त्मना ॥ १८ ॥
भ्रमित्वा पुनरायाति पूर्वकालक्रमेण च ।
तावदागत्य देवेशि तद्देशकुलनायिका ॥ १९ ॥
ददेद्भक्ष्यादिकं किंचिद्दापयेद्वाथ केनचित् ।
अनेन विधिना युक्तो गुप्ताचारो दृढव्रतः ॥ २० ॥
योगिनीमेलकं प्राप्य षण्मासेनैव सिद्ध्यति ।
दुष्करोऽयं विधिर्देवि सत्त्वहीनैर्नराधमैः ॥ २१ ॥
सर्वसिद्धिकरो मुख्यः कुलशास्त्रेषु सर्वतः ।
अथैकस्मिन्नपि ग्रामे पत्तने नगरेऽपि वा ॥ २२ ॥
तद्दिग्भागं समाश्रित्य तद्देव जपते कुलम् ।
त्रिभिरब्दैरनायासात्साधयेदुत्तमं फलम् ॥ २३ ॥
लोकयात्रापरित्यक्तो ग्रासमात्रपरिग्रहः ।
अथवा नाभिचक्रे तु ध्यानचक्रं कुलात्मकम् ॥ २४ ॥
चेतसा भ्रमणं कुर्यात्सर्वकालक्रमेण तु ।
ततोऽस्य वत्सरार्धेन देहान्तं योगिनीकुलम् ॥ २५ ॥

---

१ क० पु० यावत्तद्देशेति पाठः ।

आविर्भवत्यसंदेहात्स्वविज्ञानप्रकाशकम् ।
तेनाविर्भूतमात्रेण योगी योगिकुले कुली ॥ २६ ॥
भवेदपि पतिर्देवि योगिनां परमेश्वरि ।
अथवा चिन्तयेद्देवि यकारादिकमष्टकम् ॥ २७ ॥
स्वरूपेण प्रभाकारकरालाकुलविग्रहम् ।
तस्य मध्ये कुलेशानं स्वबोधकमनुस्मरन् ॥ २८ ॥
सर्वमेव च तत्पश्चाच्चक्रं दीपशिखाकृतिम् ।
संभूतं चिन्तयेद्योगी योगिनीपदकाङ्क्षया ॥ २९ ॥
एतस्मिन्व्यक्तिमापन्ने पिण्डस्थं बुद्ध उच्यते ।
ततोऽस्याकस्मिकी देवि महामुद्रोपजायते ॥ ३० ॥
शृङ्गारवीरकारुण्यशोककोपादयस्तथा ।
प्रबुद्धमेतदुद्दिष्टं पिण्डस्थममरार्चिते ॥ ३१ ॥
दिवसैरभियुक्तस्य ततोऽस्य बहुभिर्दिनैः ।
धरादितत्त्वभावानां संवित्तिरुपजायते ॥ ३२ ॥
सुप्रबुद्धं तदिच्छन्ति पिण्डस्थं ज्ञानमुत्तमम् ।
चक्रं च त्रिगुणाष्टारमथवा तत्र चिन्तयेत् ॥ ३३ ॥
कादिहान्ताक्षराक्रान्तं पूर्वरूपं सबिन्दुकम् ।
तत्रापि पूर्ववत्सर्वं कुर्वन्नेतत्फलं लभेत् ॥ ३४ ॥
आदिवर्णान्वितं वाथ षोडशारमनुस्मरन् ।
मध्यक्रमेण वा योगी पञ्चमं चुम्बकादिभिः ॥ ३५ ॥

द्वासप्ततिसहस्राणि नाडीनां नाभिचक्रके ।
यतः पिण्डत्वमायान्ति तेनासौ पिण्ड उच्यते॥ ३६ ॥

तत्र स्थितं तु यज्ज्ञेयं पिण्डस्थं तदुदाहृतम् ।
अ........मल........त्केश............कम् ॥ ३७ ॥

विज्वरत्वमवाप्नोति वत्सरेण यदृच्छया ।
चक्रपञ्चकमेतद्धि पूर्ववद्धृदये स्थितम् ॥ ३८ ॥

पदस्थमिति शंसन्ति चतुर्भेदं विचक्षणाः ।
यत्रार्थावगतिर्देवि तत्स्थानं पदमुच्यते ॥ ३९ ॥

चतुष्कमत्र विज्ञेयं भेदं पञ्चदशात्मकम् ।
सर्वतोभद्रसंसिद्धौ सर्वतोभद्रतां व्रजेत् ॥ ४० ॥

जरामरणनैर्गुण्यनिर्मुक्तो योगचिन्तकः ।
व्याप्तावपि प्रसिद्धायां मायाधस्तत्त्वगोचरः ॥ ४१ ॥

वेत्ति तत्पतितुल्यत्वं तदीशत्वं च गच्छति ।
पदस्थे किंतु चन्द्राभं प्रदीपाभं न चिन्तयेत् ॥ ४२ ॥

एतदेवामृतौघेन देहमापूरयत्स्वकम् ।
चिन्तितं मृत्युनाशाय भवतीति किमद्भुतम् ॥ ४३ ॥

उपलक्षणमेतत्ते चन्द्रविम्बाद्युदीरितम् ।
येन येनैव रूपेण चिन्त्यते परमेश्वरी ॥ ४४ ॥

पिण्डस्थादिप्रभेदेषु तेनैवेष्टफलप्रदा ।
रूपमैश्वरमिच्छन्ति शिवस्याशिवहारिणः ॥ ४५ ॥

यद्भ्रूमध्यस्थितं यस्मात्तेन तत्र व्यवस्थितम् ।
[1]पञ्चकं सूर्यसंकाशं रूपस्थमभिधीयते ॥ ४६ ॥

तत्रापि पूर्ववत्सिद्धिरीश्वरान्तपदोद्भवा ।
रूपातीतं तु देवेशि प्रागेवोक्तमनेकधा ॥ ४७ ॥

इत्येषा कुलचक्रस्य समासाद्व्याप्तिरुत्तमा ।
कथिता सर्वसिद्ध्यर्थं सिद्धयोगीश्वरीमते ॥ ४८ ॥

सर्वदाथ विभेदेन पृथग्वर्णविभेदतः ।
विद्यादिसर्वसंसिद्ध्यै योगिनां योगमिच्छताम् ॥ ४९ ॥

भूयोऽपि संप्रदायेन वर्णभेदश्च कीर्त्यते ।
स्त्रीरूपां हृदि संचिन्त्य सितवस्त्रादिभूषिताम् ॥ ५० ॥

नाभिचक्रोपविष्टां तु चन्द्रकोटिसमप्रभाम् ।
वीजं यत्सर्वशास्त्राणां तत्तदा स्यादनारतम् ॥ ५१ ॥

स्वकीयेनैव वक्त्रेण निर्गच्छत्प्रविचिन्तयेत् ।
तारहारलताकारं विस्फुरत्किरणाकुलम् ॥ ५२ ॥

वर्णैस्तारकसंकाशैरारब्धममितद्युति ।
मासार्धाच्छास्त्रसंघातमुद्गिरत्यनिवारितम् ॥ ५३ ॥

स्वमे मासात्समाधिस्थः षड्भिर्मासैर्यथेच्छया ।
उच्छिन्नान्यपि शास्त्राणि ग्रन्थतश्चार्थतोऽपि वा ॥ ५४ ॥

---

1 क० पु० भूषणामिति पाठः ।

जानाति वत्सराद्योगी यदि तन्मयतां गतः ।
अनुषङ्गफलं चैतत्समासादुपवर्णितम् ॥ ५५ ॥
विद्येश्वरसमानत्वसिद्धिरन्याश्च सिद्धयः ।
प्रतिवर्णविभेदेन यथेदानीं तथोच्यते ॥ ५६ ॥
ध्यातव्या योगिभिर्नित्यं तत्तत्फलबुभुक्षुभिः ।
विन्यासक्रमयोगन त्रिविधेनापि वर्त्मना ॥ ५७ ॥
यो यत्राङ्गे स्थितो वर्णः कुलशक्तिसमुद्भवः ।
तं तत्रैव समाधाय स्वरूपेणैव योगवित् ॥ ५८ ॥
स्फुरत्प्रभास्ततिमिरं कुर्वन्नत्र मनः स्थिरम् ।
पूर्वकालक्रमादेव तत्त्वाभ्यासोक्तवर्त्मना ॥ ५९ ॥
तद्वर्णव्याप्तिजं सर्वं प्राप्नोति फलमुत्तमम् ।
अथवा योजयेत्काश्चिदेनां वश्यादिकर्मसु ॥ ६० ॥
तदा प्रसाधयत्याशु साधकस्य समीहितम् ।
उदितादित्यवर्णाभां समस्ताक्षरपद्धतिम् ॥ ६१ ॥
इच्छयैनां सुवर्णाभां स्रवन्तीं मदिरां मुहुः ।
सप्ताहं चिन्तयेद्यस्य सर्वाङ्गेषु यथाक्रमम् ॥ ६२ ॥
स वश्यो दासवद्भूत्वा नान्यं स्वामिनमिच्छति ।
त्रिसप्ताद्रूपसंपन्नां पदविभ्रान्तलोचनाम् ॥ ६३ ॥

---

१ क० पु० चिन्मयतामिति पाठः ।

उर्वशीमप्यनायासादानयेत्किमु मानुषीम् ।
अनेनैव विधानेन वायुवह्निपुरान्तगाम् ॥ ६४ ॥
पिण्डाकृष्टिकरी ज्ञेया योजनानां शतैरपि ।
शरत्पूर्णनिशानाथवर्णाभैषानुसंधिता ॥ ६५ ॥
विदधात्यतुलां शान्तिमात्मनोऽथ परस्य वा ।
द्रुतहेमप्रतीकाशा स्वस्थाने संप्रयोजिता ॥ ६६ ॥
महतीं पुष्टिमाधत्ते दशाहेनैव शाङ्करि ।
जम्बूफलरसाभासां वज्रकीलकसंनिभाम् ॥ ६७ ॥
कीलने चिन्तयेद्योगी मोहने शुकपिच्छवत् ।
वज्रनीलप्रतीकाशां प्रतिस्थाननिकृन्तनीम् ॥ ६८ ॥
कालानलसमस्पर्शां रिपुनाशाय चिन्तयेत् ।
मालायेष्टरभीतानां[1] कुलमद्रिसमोपमम् (?) ॥ ६९ ॥
चिन्तयेद्धूमसंकाशामत्यन्तमनलाकुलाम् ।
शान्तिकर्मोक्तवत्कोपप्रशान्तावप्यनुस्मरन् ॥ ७० ॥
तापने तु तथा किंतु स्वरूपं सूर्यवद्बुधः ।
विद्वेषे तु कपोताभां भञ्जने चाषसंनिभाम् ॥ ७१ ॥
उत्सादे नीलहरितपीतरक्तासितां स्मरेत् ।
प्रत्यङ्गव्याधिसंभूतावेकमेव तदुद्भवम् ॥ ७२ ॥

---

१ ग० पु० मालयिष्टरभीष्टानामिति पाठः ।

वर्णं विचिन्तयेद्योगी मारणोक्तेन वर्त्मना ।
तद्वत्तु शान्तिकर्मोक्तवर्त्मना तत्प्रशान्तये ॥ ७३ ॥
चिन्तयेत्कृतके व्याधिसंघाते सहजेऽपि वा ।
अथवैतां जपन्कश्चिद्द्राक्सिद्धिमभिवाञ्छति ॥ ७४ ॥
तदानेन विधानेन प्रकुर्यादक्षमालिकाम् ।
मणिमौक्तिकशङ्खादिपद्माक्षादिविनिर्मिताम् ॥७५॥
हेमादिधातुजां वाथ शतार्धप्रमितां[2] बुधः ।
यथा स्वबाहुमात्रा स्याद्वलयाकृतितां गता ॥ ७६ ॥
तां गृहीत्वा समालभ्य गन्धधूपाधिवासिताम् ।
पूजयित्वा कुलेशानं तत्र शक्तिं निवेशयेत् ॥ ७७ ॥
प्रत्येकमुच्चरेद्बीजं परावीजपुटान्तगम्[3] ।
प्रस्फुरत्क्षान्तमेकस्मिन्नाद्यक्षे विनियोजयेत् ॥ ७८ ॥
आद्यर्णं व्यापकं भूयः सर्वाधिष्ठायकं स्मरेत् ।
द्विविधेऽपि हि वर्णानां भेदे विधिरयं मतः ॥ ७९ ॥
द्वितीयं व्यापकं वर्णं द्वितीयं पूर्ववन्न्यसेत् ।
तृतीयादिषु वर्णेषु फान्तेष्वप्येवमिष्यते ॥ ८० ॥
ततः शक्तिमनुस्मृत्य सूत्राभामेकमानसः ।
अक्षमध्यगतां कुर्यादक्षसूत्रप्रसिद्धये ॥ ८१ ॥

---

२ क० पु० शतार्धाक्षमितामिति पाठः । ३ क० पु० बीजपुटं गतमिति पाठः ।

चक्रवद्भ्रामयेदेनां यदेवात्र प्रभाषते ।
तत्सर्वं मन्त्रसंसिद्ध्यै जपत्वेन प्रकल्पते ॥ ८२ ॥
होमः स्याद्दीक्षिते तद्वद्दह्यमानेऽत्र वस्तुनि ।
विपरीतप्रयोगेन संक्रुद्धो भ्रामयेद्यदि ॥ ८३ ॥
तदा मारयते शत्रुं सभृत्यबलवाहनम् ।
अभिमन्त्र्य यदेवात्र चेतसा कर्म साधकः ॥ ८४ ॥
रात्रौ सौम्यादिभेदेऽत्र भ्रामयेदक्षसूत्रकम् ।
तदेव सिद्ध्यते देवि कृतसेवाविधेः प्रिये ॥ ८५ ॥
सेवा चात्राक्षसूत्रस्य षण्मासं परिवर्तनम् ।
विधावत्र नियुक्तस्य योगिनो वत्सरत्रयात् ॥ ८६ ॥
वाक्सिद्धिर्जायते देवि सर्वलोकसुदुर्लभा ।
वाक्सिद्धेर्नापरा सिद्धिरुत्तमा भुवि जातुचित् ॥८७॥
वाचो वर्णात्मिका यस्माद्वर्णरूपा च मालिनी ।
अथवा चिन्तयेदेनामुल्काकारां विचक्षणः ॥ ८८ ॥
निर्गच्छन्तीं स्ववक्त्राद्देहाद्विस्फुरन्तीं ततोऽप्यतः ।
स्फुलिङ्गैः कोटिसंख्यातैः संततैः किरणाकुलैः ॥ ८९॥
ग्रामं वा पत्तनं वापि नगरं देशमेव वा ।
मण्डलं पृथिवीं वापि ब्रह्माण्डं वा समस्तकम् ॥९०॥
विस्तीर्णं वा जनानीकमेकैकमुत्तमोत्तमम् ।
सबाह्याभ्यन्तरं व्याप्य पुनः प्रतिनिवृत्त्य च ॥९१॥

---

१ ग० पु० सेवाविधिरिति पाठः।

प्रविशन्तीं स्वकं देहं पूर्वाकारामनुस्मरेत् ।
एवं दिने दिने कुर्यात्तद्गतेनान्तरात्मना ॥ ९२ ॥
ततोऽस्य मासमात्रेण जनास्तत्र निवासिनः ।
आगच्छन्ति यथा तीर्थं शक्तितेजोपबृंहिताः ॥९३॥
रूपिण्यो विविधाकारा ललनाद्यास्तथा पराः ।
भूचर्यः क्षोभमायान्ति पण्मासान्नात्र संशयः ॥९४॥
योनिजा द्वा मजा (?) क्षेत्रजाताः पीठसमुद्भवाः ।
नायिकाश्च महादेवि क्रमात्क्षुभ्यन्ति वत्सरात् ॥९५॥
अन्तरिक्षगता दिव्या ब्रह्मलोकगताश्च याः ।
ब्रह्माण्डान्तर्गताः सर्वाः क्षोभं यान्ति समात्रयात्॥९६॥
स्वं स्वं ददति विज्ञानं साधकेन समीहितम् ।
यदि ता न प्रयच्छन्ति साधकेन समीहितम् ॥९७॥
नश्यते दिव्यविज्ञानं त्रुट्यते कुलसंततिः ।
दत्त्वा तु साधकेन्द्रेण प्रार्थितं फलमादरात् ॥ ९८ ॥
अनुपालितगुर्वाज्ञाः सिद्धिं प्राप्स्यन्त्यनुत्तमाम् ।
ताभ्यो विज्ञानमासाद्य योगी योगिकुले कुले ॥९९॥
भुक्त्वा यथेप्सितान्भोगान्यात्यन्ते परमं पदम् ।
इत्ययं कथितो लेशात्कौलिको विधिरुत्तमः ॥१००॥
योगिनां सर्वसिद्ध्यर्थं कुलमार्गानुसारिणाम् ॥१०१॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे कुलचक्राधिकार एकोनविंशः ॥ १९ ॥

अथ

विंशोऽधिकारः ।

अथ पिण्डादिभेदेन शाक्तं विज्ञानमुच्यते ।
योगिनां योगसिद्ध्यर्थं संक्षेपान्न तु विस्तरात् ॥ १ ॥
पिण्डं शरीरमित्युक्तं तद्वच्छक्तिशिवात्मनोः ।
ब्रह्मानन्दो बलं तेजो वीर्यमोजश्च कीर्त्यते ॥ २ ॥
अज्ञानेन निरुद्धं तदनाद्येव सदात्मनः ।
तदाविर्भूतये सर्वमनिरुद्धं प्रवर्तते ॥ ३ ॥
तेनाविर्भाव्यमानं तत्पूर्वावस्थां परित्यजत् ।
याः संवित्तीरवाप्नोति ता अधस्तात्प्रकीर्तिताः ॥ ४ ॥
तदेव पदमिच्छन्ति सर्वार्थावगतिर्यतः ।
तस्मात्संजायते नित्यं नित्यमेव शिवात्मनोः ॥ ५ ॥
तदेव रूपमित्युक्तमात्मनश्च विनश्वरम् ।
रूपातीतं तदेवाहुर्यतोक्षाविषयं परम् ॥ ६ ॥
भावनां तस्य कुर्वीत नमस्कृत्य गुरुं बुधः ।
तावदालोचयेद्वस्तु यावत्पदमनामयम् ॥ ७ ॥
नैवं न चैवं नाप्येवं नापि चैवमपि स्फुटम् ।
चेतसा योगयुक्तेन यावत्तदिदमप्यलम् ॥ ८ ॥

कृत्वा तन्मयमात्मानं सर्वाक्षार्थविवर्जितम् ।
मुहूर्तं तिष्ठते यावत्तावत्कम्पः प्रजायते ॥ ९ ॥
भ्रमणोद्भवनिद्राश्च किंचिदानन्द इत्यपि ।
तत्र यत्नेन संदध्याच्चेतः परफलेच्छया ॥ १० ॥
तदेतदात्मनो रूपं शिवेन प्रकटीकृतम् ।
यत्र तु यच्च विज्ञेयं शिवात्मकमपि स्थितम् ॥ ११ ॥
तद्रूपोद्गलकत्वेन स्थितमित्यवधारयेत् ।
तत्समभ्यसतो नित्यं स्थूलपिण्डाद्युपाश्रयात् ॥ १२ ॥
चतुर्भेदत्वमायाति भक्त्याभिन्नमपि स्वतः ।
स्थूलपिण्डे द्विधा प्रोक्तं बाह्याभ्यन्तरभेदतः ॥ १३ ॥
भौतिकं बाह्यमिच्छन्ति द्वितीयं चातिवाहिकम् ।
तत्राद्योपाश्रयाद्योगी ससंवित्तिरपि स्फुटान् ॥ १४ ॥
बाह्यार्थान्संप्रगृह्णाति किंचिदाध्यात्मिकानपि ।
द्वितीयोपाश्रयात्तत्त्वभावार्थान्संप्रपद्यते ॥ १५ ॥
ईक्षते च स्वदेहान्तः पीठक्षेत्रादिकं स्फुटम् ।
स्वरूपालोचनादस्य यत्किंचिदुपजायते ॥ १६ ॥
तत्र चेतः स्थिरीकुर्वंस्तदेव सकलं लभेत् ।
तेन तत्र न कुर्वीत चैतदुत्तमवाञ्छया ॥ १७ ॥

---

१ ग० पु० यत्र तत्र त्विति पाठः ।

पिण्डद्वयविनिर्मुक्ता किंचित्तद्वासनान्विता ।
ज्ञानकेवलान्तस्था पदमित्यभिधीयते ॥ १८ ॥

यत एतामनुप्राप्तो विज्ञानक्रमयोगतः ।
रूपोदयातिविज्ञानपदत्वं प्रतिपद्यते ॥ १९ ॥

एतच्चतुर्विधं ज्ञेयं चतुर्थार्थप्रतिश्रयात् ।
स च तत्त्वादिसंवित्तिपूर्वस्तत्पतितावधिः ॥ २० ॥

पदभावविनिर्मुक्ता किंचित्तदनुवार्जिता ।
अवस्था स्वस्वरूपस्य प्रकाशकरणी यतः ॥ २१ ॥

तेन सारूप्यमित्युक्ता रूपस्थं यत्तदान्वितम् ।
उदितादिप्रभेदेन तदप्युक्तं चतुर्विधम् ॥ २२ ॥

ज्ञानोदया च देवेशि ममत्वात्तत्फलप्रदम् ।
असुना क्रमयोगेन अन्तरा येषु संदधत् ॥ २३ ॥

चेतः शुद्धमवाप्नोति रूपातीतं परं पदम् ।
चतुर्विधं तदप्युक्तं संवित्तिफलभेदतः ॥ २४ ॥

त्रिविधं तत्समभ्यस्य सर्वसिद्धिफलेच्छया ।
चतुर्थात्तु तनुं व्यक्त्वा तत्क्षणादपवृज्यते ॥ २५ ॥

इति पिण्डादिभेदेन शिवज्ञानमुदाहृतम् ।
योगाभ्यासविधानेन मन्त्रविद्यागणं शृणु ॥ २६ ॥

पूर्वोक्तविधिसंनद्धः प्रदेशे पूर्वचोदिते ।
नाभ्यादिपञ्चदेशानां परार्णं क्वापि चिन्तयेत् ॥२७॥

स्वरूपेण प्रभाभारप्रकाशिततनूदरम् ।
दीप्तिभिस्तस्य तीव्राभिराब्रह्मभुवनं ततः ॥ २८ ॥

एवं संस्मरतस्तस्य दिवसैः सप्तभिः प्रिये ।
रुद्रशक्तिसमावेशः सुमहान्संप्रजायते ॥ २९ ॥

आविष्टो बहुवाक्यानि संस्कृतादीनि जल्पति ।
महाहास्यं तथा गेयं शिवारुदितमेव च ॥ ३० ॥

करोत्याविष्टचित्तस्तु न तु जानाति किंचन ।
मासेनैवं यदा मुक्तो यत्र यत्रावलोकयेत् ॥ ३१ ॥

तत्र तत्र दिशः सर्वा ईक्षते किरणाकुलाः ।
यां यामेव दिशं षड्भिर्मासैर्युक्तस्तु वीक्षते ॥ ३२ ॥

नानाकाराणि रूपाणि तस्यां तस्यां प्रपश्यति ।
न तेषु संदधेच्चेतः न चाभ्यासं परित्यजेत् ॥ ३३ ॥

कुर्वन्नेतद्विधं योगी भीरुरुन्मत्तको भवेत् ।
वीरः शक्तिं पुनर्याति प्रमादात्तद्गतोऽपि सन् ॥३४॥

वत्सराद्योगसंसिद्धिं प्राप्नोति मनसेप्सिताम् ।
परापरामथैतस्या अपरां वा यथेच्छया ॥ ३५ ॥

सद्भावं मातृसंघस्य हृदयं भैरवस्य वा ।
नवात्मानमपि ध्यायेद्रतिशेखरमेव वा ॥ ३६ ॥
अघोर्याद्यष्टकं वापि माहेश्याद्रिकमेव वा ।
अमृतादिप्रभेदेन रुद्रान्वा शक्तयोऽपि वा ॥ ३७ ॥
सर्वे तुल्यबलाः प्रोक्ता रुद्रशक्तिसमुद्भवाः ।
अथवामृतपूर्णानां प्रभेदः प्रोच्यते परः ॥ ३८ ॥
प्राणस्थं परयाक्रान्तं प्रत्येकमपि दीपितम् ।
विद्यां प्रकल्पयेन्मन्त्रं प्राणाक्रान्तं परासनम् ॥ ३९ ॥
द्वादशारस्य चक्रस्य षोडशारस्य वा स्मरेत् ।
अष्टारस्याथ वा देवि तस्य त्रेधा शतस्य वा ॥ ४० ॥
षडरस्याथ वा मन्त्री यथा सर्वं तथा शृणु ।
संक्षेपादिदमाख्यातं सार्धं चक्रशतद्वयम् ॥ ४१ ॥
एतत्त्रिगुणतां याति स्त्रीपुंयामलभेदतः
शान्त्यादिकर्मभेदेन प्रत्येकं द्वादशात्मताम् ॥ ४२ ॥
दक्षश्चण्डो हरः शौण्डी प्रमथो भीममन्मथौ ।
शकुनिः सुमतिर्नन्दो गोपालोऽथ पितामहः ॥ ४३ ॥
नन्दा भद्रा जया काली कराली विकृतानना ।
क्रोष्टकी भीममुद्रा च वायुवेगा हयानना ॥ ४४ ॥

---

१ क० पु० हरिश्चण्डीति पाठः ।

गम्भीरा घोषणी चैव द्वादशैताः प्रकीर्तिताः ।
आग्नेय्यादिचतुष्कोणा ब्रह्माण्याद्या अपि प्रिये ॥ ४५॥
सिद्धिर्ऋद्धिस्तथा लक्ष्मीर्दीप्तिर्माला शिखा शिवा ।
सुमुखी वामनी नन्दा हरिकेशी हयानना ॥ ४६ ॥
विश्वेशी च सुमाख्या च एता वा द्वादश क्रमात् ।
एतासां वाचका ज्ञेयाः स्वराः षण्ढविवर्जिताः ॥ ४७ ॥
षोडशारेऽमृताद्याश्च स्त्रीपुंपाठप्रभेदतः ।
श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्तिः शर्वरीश्वरः ॥४८॥
अर्घेशो भारभूतिश्च स्थितिः स्थाणुर्हरस्तथा ।
झिण्ठीशो भौतिकश्चैव सद्योजातस्तथापरः ॥ ४९ ॥
अनुग्रहेश्वरः क्रूरो महासेनोऽथ षोडश ।
सिद्धिर्ऋद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः स्वधा धृतिः ॥५०॥
दीप्तिः पुष्टिर्मतिः कीर्तिः संस्थितिः सुगतिः स्मृतिः ।
सुप्रभा षोडशी चेति श्रीकण्ठादिकशक्तयः ॥ ५१ ॥
षोडशारे स्वरा ज्ञेया वाचकत्वेन सर्वतः ।
अघोराद्यास्तथाष्टारे अघोर्याद्याश्च देवताः ॥ ५२ ॥
माहेश्याद्यास्तथा देवि चतुर्विंशत्यतः शृणु ।
नन्दादिकाः क्रमात्सर्वा ब्रह्माण्याद्यास्तथैव च ॥ ५३ ॥

१ ग० पु० सामाख्या चेति पाठः

संवर्तो लकुलीशश्च भृगुः श्वेतो बकस्तथा ।
शूली पिनाकी भुजंगो नवमो बलिरेव च ॥ ५४ ॥
महाकालो द्विरण्डश्च च्छगलाण्डः शिखी तथा ।
लोहितो मेषमीनौ च त्रिदण्ड्याषाढिनामकौ ॥ ५५ ॥
उमाकान्तोऽर्धनारीशो दारुको लाङ्गली तथा ।
तथा सोमेशशर्माणौ चतुर्विंशत्यमी मताः ॥ ५६ ॥
कादिभान्ताः परिज्ञेया अष्टारे याद्यमष्टकम् ।
मकारो विन्दुरूपस्थः सर्वेषामुपरि स्थितः ॥ ५७ ॥
जुंकारोऽथ तथा स्वाहा षडरे षट् क्रमेण तु ।
वलिश्च वलिनन्दश्च दशग्रीवो हरो हयः ॥ ५८ ॥
माधवश्च महादेवि षष्ठः संपरिकीर्तितः ।
शिखा विश्वेश्वरी चैव हाराद्री वीरनायिका ॥ ५९ ॥
अम्बा गुर्वेति योगिन्यो वीजैस्तैरेव षट् स्मृताः ।
अन्योन्यवलिताः सर्वे स्वाम्यावरणभेदतः ॥ ६० ॥
अकरादिक्षकारान्ताः सर्वसिद्धिफलप्रदाः ।
ध्यानाराधनयुक्तानां योगिनां मन्त्रिणामपि ॥ ६१ ॥
अथवा सर्वचक्राणां मध्ये विद्यां यथेप्सिताम् ।
मन्त्रं वा पूर्वमुदिष्टं जपन्ध्यायन्प्रसिद्ध्यति ॥ ६२ ॥
इति संक्षेपतः प्रोक्तं सर्वकामफलप्रदम् ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे सर्वमन्त्रनिर्णयो नाम
विंशतितमोऽधिकारः ॥ २०॥

---

१ क० पु० भुजगी नवमा दालिरित्येवंविधः पाठः । २ क० पु० दुरण्डश्चेति पाठः । ३ क० पु० त्रिदण्डाषाढेति पाठः ।

अथ

एकविंशतितमोऽधिकारः

अथातः परमं गुह्यं शिवज्ञानामृतोत्तमम् ।
व्याधिमृत्युविनाशाय योगिनामुपवर्ण्यते ॥ १ ॥
षोडशारे खगे चक्रे चन्द्रकल्पितकर्णिके ।
स्वरूपेण परां तत्र स्रवन्तीममृतं स्मरेत् ॥ २ ॥
पूर्वन्यासेन संनद्धः क्षणमेकं विचक्षणः
ततस्तु रसनां नीत्वा लम्बके विनियोजयत् ॥ ३ ॥
स्रवन्तममृतं दिव्यं चन्द्रविम्बसितं स्मरेत् ।
मुखमापूर्यते तस्य किंचिल्लवणवारिणा ॥ ४ ॥
लोहगन्धेन तच्चात्र न पिबेत्किंतु निक्षिपेत् ।
एवं समभ्यसेत्तावद्यावत्तत्स्वादु जायते ॥ ५ ॥
जराव्याधिविनिर्मुक्तो जायते तत्पिबंस्ततः ।
षड्भिर्मासैरनायासाद्वत्सरान्मृत्युजिद्भवेत् ॥ ६ ॥
तत्र स्वादुनि संजाते तदाप्रभृति तत्रगम् ।
यदेव चिन्तयेद्द्रव्यं तेनास्यापूर्यते मुखम् ॥ ७ ॥

---

१ ग० पु० रसतां नीत्वेति पाठः ।

२ क० पु० विम्बात्स्मितं स्मरेदिति पाठः ।

रुधिरं मदिरां वाथ वसां वा क्षीरमेव वा ।
घृततैलादिकं वाथ द्रवद्रव्यमनन्यधीः ॥ ८ ॥

अथान्यं संप्रवक्ष्यामि संक्रान्तिविधिमुत्तमम् ।
मृते जीवच्छरीरे तु प्रविशेद्योगविद्यया ॥ ९ ॥
निवातस्थो जितप्राणो जितासनविधिक्रमः ।
कुर्वीत वायुनावेशमर्कतूले शनैः शनैः ॥ १० ॥
स्वादाकृष्टिविधिं यावद्गुडे निम्बे च कारयेत् ।
श्रीखण्डगुडकर्पूरैस्ततः कृत्वाकृतिं शुभाम् ॥ ११ ॥
प्रगुणामगुण..........न्यङ्गेषु संदधत् ।
न्यासं कृत्वापि तत्रापि वेधं कुर्याच्छनैः शनैः ॥१२॥
निरोधं तत्र कुर्वीत घट्टनं तदनन्तरम् ।
घट्टनं नाम विज्ञेयमङ्गप्रत्यङ्गचालनम् ॥ १३ ॥
एवमभ्यसतस्तस्य योगयुक्तस्य योगिनः ।
चलते प्रतिमा सा तु धावते चापि संमुखी ॥ १४ ॥
पुनस्तां प्रेरयेत्तावद्यावत्स्वस्थानमागताम् ।
पतितां चालयेद्भूय उत्तानां पार्श्वतः स्थिताम् ॥१५॥
एवं सर्वात्मनस्तावद्यावत्स्ववशतां गताम् ।
ततः प्रभृत्यसौ योगी प्रविशेद्यत्र रोचते ॥ १६ ॥

१ क० पु० स्वादाकृष्येति पाठः

मृते जीवच्छरीरे वा संक्रान्त्याक्रान्तिभेदतः ।
प्रक्षिप्य जलवच्छक्तिजालं सर्वाङ्गसंधिषु ॥ १७ ॥
प्रत्यङ्गमङ्गतस्तस्य शक्तिं तेनाक्रमेद्बुधः ।
स्वकीयं रक्षयेद्देहमाक्रान्तावन्यथा त्यजेत् ॥ १८ ॥
बहून्यपि शरीराणि दृढलक्ष्यो यदा भवेत् ।
तदा गृह्णात्यसंदेहं युगपत्संत्यजन्नपि ॥ १९ ॥
अथापरं प्रवक्ष्यामि सद्यः प्रत्ययकारकम् ।
समाधानामृतं दिव्यं योगिनां मृत्युनाशनम् ॥ २० ॥
चन्द्राकृष्टिकरं नाम मासाद्वा योगभोगदम् ।
शुक्लपक्षे द्वितीयायां मेषस्थे तिग्मशोचिषि ॥ २१ ॥
स्नातः शुचिर्निराहारः कृतपूजाविधिर्बुधः ।
न्यसेच्चन्द्रे कलाजालं परया समधिष्ठितम् ॥ २२ ॥
सर्वबाधापरित्यक्ते प्रदेशे संस्थितो बुधः ।
एकचित्तः प्रशान्तात्मा शिवसद्भावभावितः ॥ २३ ॥
तावदालोकयेच्चन्द्रं यावदस्तमुपागतः ।
ततो भुञ्जीत दुग्धेन चन्द्रध्यानसमन्वितः ॥ २४ ॥
एवं दिने दिने कुर्याद्यावत्पञ्चदशी भवेत् ।
शेषां रात्रिं स्वपेद्ध्यायंश्चन्द्रबिम्बगतां पराम् ॥ २५ ॥

१ क० पु० निराकार इति पाठः ।

पौर्णमास्यां तथा योगी अर्धरात्र उपस्थितः ।
जने निःशब्दतां याते प्रसुप्ते सर्वजन्तुभिः ॥ २६ ॥
चन्द्रकोटिकरप्रख्यां तारहारविभूषणाम् ।
सिताम्बरपरीधानां सितचन्दनचर्चिताम् ॥ २७ ॥
मौक्तिकाभरणोपेतां सुरूपां नवयौवनाम् ।
आप्यायनकरीं देवीं समन्तादमृतस्रवाम् ॥ २८ ॥
राजीवासनसंस्थां च योगनिद्रामवस्थिताम् ।
चन्द्रबिम्बे परां देवीमीक्षते नात्र संशयः ॥ २९ ॥
ततस्तां चेतसा व्याप्य तावदाकर्षयेत्सुधीः ।
यावन्मुखाग्रमायाता तत्र कुर्यात्स्थिरं मनः ॥ ३० ॥
ततः प्रसार्य वदनं ध्यानासक्तेन चेतसा ।
निगिरेत्तां समाकृष्य भूयो हृदि विचिन्तयेत् ॥ ३१ ॥
तया प्रविष्टया देहं योगी दुःखविवर्जितः ।
शक्तितुल्यबलो भूत्वा जीवेदाचन्द्रतारकम् ॥ ३२ ॥
एकोऽप्यनेकधात्मानं संविभज्य निजेच्छया ।
त्रैलोक्यं यौगपद्येन भुनक्ति वशतां गतम् ॥ ३३ ॥
आसाद्य विपुलान्भोगान्प्रलये समुपस्थिते ।
परमभ्येति निर्वाणं दुष्प्रापमकृतात्मनाम् ॥ ३४ ॥

---

१ क० पु० वशमेति चेति पाठः ।

अथवा तन्न शक्नोति गगने परिचिन्तितुम् ।
प्रतिविम्बे तथा ध्यायेदुदकादिषु पूर्ववत् ॥ ३५ ॥
तत्पीत्वा मनसा शेषां स्वपेद्रात्रिमनुस्मरन् ।
पूर्वोक्तं समवाप्नोति षड्भिर्मासैरखण्डितम् ॥ ३६ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे चन्द्राकृष्ट्यधिकार एकविंशतितमः॥२१॥

अथ

द्वाविंशतितमोऽधिकारः ।

अथान्यत्परमं गुह्यं कथयामि तव प्रिये ।
यन्न कस्यचिदाख्यातं योगामृतमनुत्तमम् ॥ १ ॥

सूर्याकृष्टिकरं नाम योगिनां योगसिद्धिदम् ।
सम्यग्भ्यासचतुष्केण दिनाष्टाभ्यधिकेन तु ॥ २ ॥

प्रहरस्याष्टमो भागो नाडिकेत्यभिधीयते ।
तत्पादक्रमवृद्ध्या तु प्रतिवासरमभ्यसेत् ॥ ३ ॥

उदयास्तमयं यावद्यत्र सूर्यः प्रदृश्यते ।
प्रदेशे तत्र विजने सर्वबाधाविवर्जिते ॥ ४ ॥

अहोरात्रोषितो योगी मकरस्थे दिवाकरे ।
शुचिर्भूत्वा कृतन्यासः कृतशीतप्रतिक्रियः ॥ ५ ॥

भानुविम्बे न्यसेच्चक्रमष्टषद्‌द्वादशारकम् ।
शिवशक्तिघनोपेतं भैरवाष्टकसंयुतम् ॥ ६ ॥

वर्षादिऋतुसंयुक्तं मासैर्ऋक्षादिभिर्युतम् ।
अष्टारं चिन्तयेद्बिम्बे शेषं रश्मिषु चिन्तयेत् ॥ ७ ॥

तत्र चित्तं समाधाय प्रोक्तकालं विचक्षणः ।
अनिमीलितनेत्रस्तु भानुविम्बं निरीक्षयेत् ॥ ८ ॥

ततः काले व्यतिक्रान्ते सुनिमीलितलोचनः ।
प्रविशेदन्धकारान्तर्भुवनं निरुपद्रवम् ॥ ९ ॥
तत्रोन्मीलितनेत्रस्तु बिम्बाकारं प्रपश्यति ।
संधाय तत्र चैतन्यं तिष्ठेद्यावन्न पश्यति ॥ १० ॥
नष्टेऽपि चेतसा शेषं तिष्ठेत्कालमनुस्मरन् ।
एवं मासेन देवेशि स्थिरं तदुपजायते ॥ ११ ॥
मासद्वयेन सर्वत्र प्रेक्षते नात्र संशयः ।
त्रिभिः समीक्षते सर्वं रविबिम्बसमाकुलम् ॥ १२ ॥
प्रोक्तकालावसानेन वृषस्थे तिग्मरोचिषि ।
प्रेक्षते सूर्यबिम्बान्तः सचक्रं परमेश्वरम् ॥ १३ ॥
उपलब्धं समाकृष्य मुखाग्रे स्थिरतां नयेत् ।
आपीय पूर्ववत्पश्चाद्वृत्तिं निश्चलतां नयेत् ॥ १४ ॥
तत्र तेन सहात्मानमेकीकृत्य मुहूर्तकम् ।
यावत्तिष्ठति देवेशि तावत्संत्यजति क्षितिम् ॥ १५ ॥
पश्यतो जनवृन्दस्य याति सूर्येण चैकतः ।
अनेन विधिना देवि सिद्धयोगीश्वरेश्वरः ॥ १६ ॥
शिवाद्यवनिपर्यन्तं न क्वचित्प्रतिहन्यते ।
भुक्त्वा तु विपुलान्भोगान्निष्कले लीयते परे ॥ १७ ॥
तदेतत् खेचरीचक्रं यत्र खेचरतां व्रजेत् ।
सिद्धयोगीश्वरीतन्त्रे सरहस्यमुदाहृतम् ॥ १८ ॥

अथवा चक्ररूपेण सवाह्याभ्यन्तरं स्वकम् ।
देहं चिन्तयतः पूर्वं फलं स्यान्निश्चितात्मनः ॥ १९ ॥
उच्चरन्फादिनान्तां वा ध्वनिज्योतिर्मरुद्युताम् ।
विश्राम्य मस्तके चित्तं क्षणमेकं विचक्षणः ॥ २० ॥
त्रिशूलेन प्रयोगेन सद्यस्त्यजति मेदिनीम् ।
एवं समभ्यसन्मासाच्चक्रवद्भ्रमति क्षितौ ॥ २१ ॥
मुहूर्तं स्पृशते भूमिं मुहूर्ताच्च नभस्तलम् ।
शिवारावादि कुरुते वलनास्फोटनानि च ॥ २२ ॥
मुद्रावन्धादिकं वाथ भाषा वा वक्त्यनेकधा ।
षण्मासान्मेदिनीं त्यक्त्वा समाधिस्थो दृढेन्द्रियः ॥२३॥
तिष्ठते हस्तमात्रेण गगने योगचिन्तकः ।
पश्यते योगिनीवृन्दमनेकाकारलक्षणम् ॥ २४ ॥
संवत्सरेण युक्तात्मा तत्समानः प्रजायते ।
पश्यतामेव लोकानां तेजोभिर्भासयन्दिशः ॥ २५ ॥
यात्युत्कृष्य महीपृष्ठात् खेचरीणां पतिर्भवेत् ।
मुद्रा खगेश्वरी नाम कथिता योगिनीमते ॥ २६ ॥
जागरित्वाथ वा योगी त्र्यहोरात्रमतन्द्रितः ।
चतुर्थेऽह्नि निशारम्भे पूजयित्वा महेश्वरम् ॥ २७ ॥
ततोऽन्धकारे बहुले कृतरक्षाविधिर्बुधः ।
भ्रुवोर्मध्ये समाधाय क्षणं चेतः प्रपश्यति ॥ २८ ॥

तेजो रूपप्रतीकाशं पर्यङ्कासनमास्थितः ।
प्रयोगं त्वेव सततं योगयुक्तः समभ्यसेत् ॥ २९ ॥
पश्यते मासमात्रेण गृहान्तर्वस्तु यत् स्थितम् ।
द्वाभ्यां वहिः स्थितं सर्वं त्रिभिः पत्तनसंस्थितम् ॥ ३० ॥
चतुर्भिर्विषयान्तःस्थं पञ्चभिर्मण्डलावधि ।
षड्भिर्मासैर्महायोगी च्छिद्रां पश्यति मेदिनीम् ॥ ३१ ॥
सर्वज्ञत्वमवाप्नोति वत्सरान्नात्र संशयः ।
योगिनीसिद्धसंघस्य सद्भावव्याप्तिसंस्थितम् ॥ ३२ ॥
पश्यते योगयुक्तात्मा तत्समानश्च जायते ।
अनेनैव विधानेन स्वस्तिकासनसंस्थितः ॥ ३३ ॥
विन्दुं नानाविधं त्यक्त्वा शुद्धरूपमनुस्मरेत् ।
तेनापि सर्वं पूर्वोक्तं व्याप्नोति फलमुत्तमम् ॥ ३४ ॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे सूर्यांकृष्टयधिकारो द्वाविंशतितमः ॥२२॥

अथ

त्रयोविंशतितमोऽधिकारः ।

अथातः परमं गुह्यं कथयामि तवाधुना ।
सद्योपलब्धिजनकं योगिनां योगसिद्धये ॥ १ ॥

पूर्वन्यासेन संनद्धश्चित्तं श्रोत्रे निवेशयेत् ।
निवाते स्वल्पवाते वा बाह्यशब्दविवर्जिते ॥ २ ॥

ततस्तत्र शृणोत्येष योगी ध्वनिमनाहतम् [2] ।
सुविशुद्धस्य कांस्यस्य हतस्येह मुहुर्मुहुः ॥ ३ ॥

यमाकर्ण्य महादेवि पुण्यपापैः प्रमुच्यते
तत्र संधाय चैतन्यं षण्मासाद्योगवित्तमः ॥ ४ ॥

रुतं पक्षिगणस्यापि प्रस्फुटं वेत्त्ययत्नतः ।
दूराच्छ्रवणविज्ञानं वत्सरेणास्य जायते ॥ ५ ॥

सर्वकामफलावाप्तिर्वत्सरत्रितयेन च ।
सिद्ध्यतीति किमाश्चर्यमनायासेन सिद्ध्यति ॥ ६ ॥

अथवा ग्रहणे मासि कृत्वा सूर्यं तु पृष्ठतः ।
पूर्वन्यासेन संनद्धः किंचिद्भित्तिमदाश्रितः ॥ ७ ॥

---

१ क० पु० सद्यः फलानुजनकमिति पाठः ।

२ ग० पु० ध्वनिमनाहतमिति पाठः ।

लक्षयेदात्मनश्छायां मस्तकोर्ध्वमनाहताम् ।
धूमवर्तिविनिष्क्रान्तां तद्गतेनान्तरात्मना ॥ ८ ॥
याति तन्मयतां तत्र योगयुक्तो यथा यथा ।
तथा तथास्य महती सा वित्तिरुपजायते ॥ ९ ॥
ततस्तत्र महातेजः स्फुरत्किरणसंनिभम् ।
पश्यते यत्र दृष्टेऽपि सर्वपापक्षयो भवेत् ॥ १० ॥
तदस्याभ्यसतो मासात्सर्वत्र प्रविसर्पति ।
ज्वालामालाकुलाकारा दिशः सर्वाः प्रपश्यति ॥ ११ ॥
षण्मासमभ्यसन्योगी सर्वज्ञत्वमवाप्नुयात् ।
अब्दं दिव्यतनुर्भूत्वा शिववन्मोदते चिरम् ॥ १२ ॥
अथ जात्यः प्रवक्ष्यन्ते सपूर्वासनशाश्वताः ।
ह्रीं क्ष्लों क्ष्वीं वं तथा क्षं च पञ्चकस्य यथाक्रमम् ॥ १३ ॥
हं यं रं लं तथा वं च पञ्चकस्यापरस्य च ।
ॠ ॠ ऌ ॡ तथा ओं औं हः अं आकर्णिकावधौ ॥ १४ ॥
केसरेषु भकारान्ता हं हां हिं हीं च हुं तथा ।
हूं हें हैं च दलेष्वेवं स्वसंज्ञाभिश्च शक्तयः ॥ १५ ॥
मण्डलत्रितये शेषं सूक्ष्मं प्रेतस्य कल्पयेत् ।
ज्रकारं शूलशृङ्गाणामित्येतत्परिकीर्तितम् ॥ १६ ॥

१ ग० पु० अब्दाद्दिव्यतनुरिति पाठः । २ ग० पु० क्षामिति पाठः ।

अनुक्तासनयोगेषु सर्वत्रैवं प्रकल्पयेत् ।
नमः स्वाहा तथा वषट् हुं वौषट् फट् च जातयः ॥१६॥
प्रायश्चित्तेषु सर्वेषु जपेन्मालामखण्डिताम् ।
भिन्नां वाप्यथवाभिन्नामतिक्रमबलाबलाम् ॥ १७ ॥
सकृज्जपात्समारभ्य यावल्लक्षत्रयं प्रिये ।
प्राणवृत्तिनिरोधेन ततः परतरं क्वचित् ॥ १८ ॥
सदा भ्रमणशीलानां पीठक्षेत्रादिकं बहिः ।
प्रयोगं संप्रवक्ष्यामि सुखसिद्धिफलप्रदम् ॥ १९ ॥
नासाक्रान्तं महाप्राणं दण्डरूपं सबिन्दुकम् ।
तद्वद्द्वयं च कुर्वीत विद्येयं त्र्यक्षरा मता ॥ २० ॥
अस्याः पूर्वोक्तविधिना कृतसेवः प्रसन्नधीः ।
पीठादिकं भ्रमेत्सिद्ध्यै नान्यथा वीरवन्दिते ॥ २१ ॥
तत्प्रदेशं समासाद्य मन्त्रैरात्मानमादरात् ।
विद्यया वेष्टयेत्स्थानं रक्तसूत्रसमानया ॥ २२ ॥
बहुधानन्यचित्तस्तु सबाह्याभ्यन्तरं बुधः ।
ततस्तत्र क्वचित्क्षेत्रे योगिन्यो भीमविक्रमाः ॥ २३ ॥
समागत्य प्रयच्छन्ति संप्रदायं स्वकं स्वकम् ।
येनासौ लब्धमात्रेण संप्रदायेन सुव्रते ॥ २४ ॥
तत्समानबलो भूत्वा भुङ्क्ते भोगान्यथेप्सितान् ।
अथवा कृतसेवस्तु लक्षमेकं जपेत्सुधीः ॥ २५ ॥

तर्पयित्वा दशांशेन क्षुद्रकर्मसु योजयेत् ।
तत्रोच्चारितमात्रेयं विषक्षयकरी भवेत् ॥ २६ ॥
चक्रवद्भ्रममाणैषा योनौ रक्तां विचिन्तयेत् ।
गमागमक्रमाद्वापि विन्द.........वारिता ॥ २७ ॥
तत्रस्थश्चाशु संघातविघाताकुञ्चनेन तु ।
क्षणादनन्यचित्तस्तु क्षोभयेदुर्वशीमपि ॥ २८ ॥
कृतसेवाविधिर्वाथ लक्षत्रयजपेन तु ।
महतीं श्रियमाधत्ते पद्मश्रीफलतर्पिता ॥ २९ ॥
षडुत्थासनसंस्थाना साधिताप्युक्तवर्त्मना ।
सर्वसिद्धिकरी देवी मन्त्रिणामुपजायते ॥ ३० ॥
शूलपद्मविधिं मुक्त्वा नवात्माद्यं च सप्तकम् ।
षडुत्थमासनं दद्यात्सर्वचक्रविधौ बुधः ॥ ३१ ॥
मुद्रा च महती योज्या हृद्बीजेनोपचारकम् ।
अथान्यत्संप्रवक्ष्यामि स्वप्नज्ञानमनुत्तमम् ॥ ३२ ॥
हृच्चक्रे तन्मयो भूत्वा रात्रौ रात्रावनन्यधीः ।
मासादूर्ध्वं महादेवि स्वप्ने यत्किंचिदीक्षते ॥ ३३ ॥
तत्तथ्यं जायते तस्य ध्यानयुक्तस्य योगिनः ।
तत्रैव यदि कालस्य नियमेन रतो भवेत् ॥ ३४ ॥
तदा प्रथमयामे तु वत्सरेण शुभाशुभम् ।
षट्त्रिमासेन क्रमशो द्वितीयादिष्वनुक्रमात् ॥ ३५ ॥

अरुणोदयवेलायां दशाहेन फलं लभेत् ।
संकल्पपूर्वकेऽप्येवं परेषामात्मनोऽपि वा ॥ ३६ ॥
कचित्कार्ये समुत्पन्ने सूक्ष्मज्ञानमुपाक्रमेत् ।
इत्येतत्कथितं देवि सिद्धयोगीश्वरीमतम् ॥ ३७ ॥
नातः परतरं ज्ञानं शिवाध्वनिगोचरे ।
य एवं तत्त्वतो वेद स शिवो नात्र संशयः ॥ ३८ ॥
तस्य पादरजः मूर्ध्नि धृतं पापप्रशान्तये ।
एतच्छ्रुत्वा महादेवी परं संतोषमागता ॥ ३९ ॥
एवं क्षमापयामास प्रणिपत्य पुनः पुनः ।
इति वः सर्वमाख्यातं मालिनीविजयोत्तरम् ॥ ४० ॥
ममैतत्कथितं देव्या योगामृतमनुत्तमम् ।
भवद्भिरपि नाख्येयमशिष्याणामिदं महत् ॥ ४१ ॥
न चापि परशिष्याणामपरीक्ष्य प्रयत्नतः ।
सर्वथैतत्समाख्यातं योगाभ्यासरतात्मनाम् ॥ ४२ ॥
प्रयतानां विनीतानां शिवैकार्पितचेतसाम् ।
कार्तिकेयात्समासाद्य ज्ञानामृतमिदं महत् ॥ ४३ ॥
मुनयो योगमभ्यस्य परां सिद्धिमुपागताः ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे त्रयोविंशतितमोऽधिकारः ॥ २३ ॥

समाप्तं चेदं मालिनीविजयोत्तरं नाम महातन्त्रम् ॥

———:०:———

श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन संपाद्येदं प्रकाशितम् ॥

श्रीसाम्बशिवार्पणमस्तु ।